Shri. D.D. Bhaw...

Ashokavan.

Gokarn (N.K)

॥ ॐ श्रीः ॥

२ १ कुमारः आत्रेयः

३ २ आत्रिः -

४ ३ कुमारो यामायनः ।

ऋग्वेदां सूक्तानां भाष्याणि

१ प्रथमं ज्ञानदन्यमाप्रोसूक्तम्

सायनभाष्यम्

देवरातः

अशोकावनम्

गोकर्ण

॥ ई ॐ श्रीः ॥

जामदग्न्यं आप्रीसूक्तम् ॥

॥ सायनभाष्यम् ॥

"समिद्धः" इत्येकादशर्चम् एकादशं सूक्तम्, त्रैष्टुभम्। भार्गवो जमदग्निः ऋषिः। तस्य पुत्रो रामो वा, यः "परशुरामः" इति प्रख्यातः॥ आप्रीसूक्तमिदम्॥ अतः समिदाद्याः सतनूनपातः नराशंसवर्जिताः। प्रत्यृचं देवताः॥ तथा चानुक्रान्तम् – समिद्ध एकादश जमदग्निस्तातो वा राम आप्रियः" इति॥

पशौ जामदग्न्यानामिदमाप्रीसूक्तम्। यद्वा अविशेषेण सर्वेषाम्॥ सूत्रितं च "समिद्धो अद्येति सर्वेषां यथर्षि वा। (आश्व. श्रौ. सूत्रम् ३.२) इति॥

अग्निचयनाङ्गभूते प्राजापत्ये पशौ सर्वेषां नित्यमिदमाप्रीसूक्तम्। सूत्रितं च। "प्राजापत्ये तु – जामदग्न्यः सर्वेषाम्" इति। (आश्व. श्रौ. सू. ३.२)

॥ अथ प्रथमा ऋक् ॥ वेदः ५

"समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजासि जात-
वेदः। आ च वह मित्रमहश्चिकित्वान् त्वं दूतः कविरसि प्रचेताः॥
॥ १५

॥ पदपाठः ॥

सम्ऽइद्धः। अद्य। मनुषः। दुरोणे।
देवः। देवान्। यजासि। जातऽवेदः॥
आ। च। वह। मित्रऽमहः। चिकित्वान्।
त्वम्। दूतः। कविः। असि। प्रऽचेताः॥

सायनभाष्यम्

"हे जातवेदः - जातप्रज्ञाग्ने देवः स्वतेजसा
दीप्यमानः त्वं - मनुषः मनुष्यस्य यज्ञः दुरोणे।
गृहनामैतत्। दुरवने आयासेन रक्षितव्ये गृहे
अद्य अस्मिन् कर्मणि, समिद्धः सम्यक् प्रज्वलितः,
सन्, देवान् इन्द्रादीन् यजासि। हविर्भिः पूजय॥
(व्याकरणम् - "समिद्धः" "इन्धी दीप्तौ" कर्मणि क्तः,
"श्वीदितो निष्ठायाम्" इति इट् प्रतिषेधः। "गतिरनन्तरः"
इति गतेः प्रकृतिस्वरत्वम्॥ हे मित्रमहः " स्तुत-
स्तोतृलक्षणेन मित्रभूतानां स्तोतॄणां पूजयितः,
तैः पूज्यमान वा अग्ने, चिकित्वान् तैः कृताः

स्तुतीः प्रज्ञानन् चेतनवान् वा त्वं अस्मदीये यज्ञे
देवान् = आवह, च आ प्रापय॥ "वह प्रापणे"
लोटि रूपम्। "चवायोगे प्रथमा" इति न निघातः।
तथा कविः क्रान्तप्रज्ञः, अत एव प्रचेताः,
प्रकृष्टज्ञानः, त्वं दूतः देवानां हविष्प्रापणेन
हितकारी भवसि॥ १॥

॥ अथ द्वितीया ऋक्॥ २॥

॥ तनूनपादग्निः॥ (२।)

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्स्वदया सुजिह्व॥
मन्मानि धीभिरुत यज्ञमृन्धन्देवत्रा च कृणुह्यध्वरं नः॥ ॥२॥

॥ पदपाठः

तनूऽनपात्। पथः। ऋतस्य। यानान्।
मध्वा। सम्ऽअञ्जन्। स्वदय। सुऽजिह्व॥
मन्मानि। धीभिः। उत। यज्ञम्। ऋन्धन्।
देवऽत्रा। च। कृणुहि। अध्वरम्। नः॥ २॥

२॥ सायन भाष्यम्

"हे तनूनपात्! नपादिति-अनन्तरापत्यनामधेयम्।
"गौरत्र तनूरुच्यते। ततः अस्यां [illegible]ः क्षीरादयः इति"

ततस्याः पयो जायते, पयसः आज्यम्, तस्मादग्निः।
"यद्वा- अन्तरिक्षे ता आपः तन्वः, ताभ्यः
ओषध्यादयः तेभ्योऽग्निरिति। हे त्वं स्वप्रजिह्व
शोभनज्वाल। यद्वा - जिह्वा इति वाङ्नाम। शोभन-
वाग्- अग्ने!, तस्य यज्ञस्य यानान् फलप्राप्ति-
हेतून्, पथः- मार्गान् हविर्दारव्यान्, मध्वा
मदकरेण रसेन, यद्वा- वाग्जनितेन रसेन
समञ्जन् सन्दीपयन् स्वदय- स्वादय। स्वीकुरु।।
"स्वद आस्वादने" णिचि उपधावृद्ध्यभावः छान्दसः
किं च- मन्मानि, मन्यते स्तुतिकर्मणः मननी-
यानि अस्मदादि प्रेतानि स्तोत्राणि, धीभिः
प्रज्ञाभिः कर्मभिर्वा, उत- अपि च यज्ञं यजनीयं
हविश्च ऋन्धन् समृद्धानि कुर्वन् नः अस्मदीयं
अध्वरं यज्ञं देवत्रा देवेषु कृणुहि कुरु।।
~~[illegible]~~ "देवमनुष्यपुरुषादिभ्यः सप्तम्यर्थे
त्राप्रत्ययः ।। २५

५ (इळोऽग्निः)

॥ अथ तृतीया ऋक् ॥

"आजुह्वान ईड्यो वन्द्यश्चायाह्यग्ने वसुभिः सजोषाः ॥
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥३॥

पदपाठः

आऽजुह्वानः। ईड्यः। वन्द्यः। च।
आ। याहि। अग्ने। वसुऽभिः। सऽजोषाः॥
त्वं। देवानाम्। असि। यह्व। होता।
सः। एनान्। यक्षि। इषितः। यजीयान् ॥३॥

॥ सायनभाष्यम् ॥

हे अग्ने! त्वं अस्मत् कर्माणि आयाहि आगच्छ। कीदृशः - आजुह्वानः, देवानामाह्वाता। "हु दानादनयोः" जौहोत्यादिकः। अभ्यस्त स्वरः। ईड्यः "ईडिरध्येषणा कर्मा" अध्येषणीयः प्रार्थ्यमानः, वन्द्यः स्तोतव्यः, वसुभिः देवैः सजोषाः सह प्रीयमाणः, आगत्य च हे (अग्ने) यह्व! "महन्नामैतत्" हे महन्! सः त्वं देवानां होता आह्वाता असि ततः यजीयान् ॥ यह्व शब्दादीयसुनि "तुरिष्ठेमेयःसु" इति तृचो लोपः। यष्टृतरः सः त्वं इषितः अस्माभिरध्येषितः प्रार्थितः सन् तान् देवान् यक्षि यज। हविषा पूजय ॥३॥

॥ अथ चतुर्थी ऋक् ॥

॥ बर्हिरग्निः ॥ ४ (देवता) (अह्नाम् ॥

॥ प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे-
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥४॥

॥ पदपाठः ॥

प्राचीनम्। बर्हिः। प्रऽदिशा। पृथिव्याः।
वस्तोः। अस्याः। वृज्यते। अग्रे। अह्नाम् ॥
वि। ऊँ इति। प्रथते। विऽतरम्। वरीयः
देवेभ्यः। अदितये। स्योनम् ॥ ४ ॥

॥ सायन भाष्यम् ॥

"यदिदं प्राचीनं प्रागग्रितं प्राङ्मुखं बर्हिः अस्ति"
तदिदं पृथिव्याः वेदिलक्षणायाः वस्तोः। "वस् आच्छादने" तुन् प्रत्ययः। "चतुर्थ्यर्थे बहुलं छन्दसि" इति षष्ठी।
यद्वा - भावलक्षणे तोसुन्(प्रत्ययः) द्रष्टव्यः।
वसनाय- आच्छादनार्थम्। अह्नाम् अग्रे पूर्वाह्णे
प्रदिशा प्रकर्षेण दिश्यमानेन मन्त्रेण अस्याः प्राच्याः
दिशः वृज्यते स्तूयते आह्रियते। तथा च निगमः-
"ता आवहन्ति कवयः पुरस्तात्" (तै. सं. ५।१।२।१)
"तच्चाहृतम् वरीयः उरुतरं बर्हिः वितरं विस्तीर्ण
(तरम्।

यथा भवति तथा विप्रथते - विविधमेव वेद्याः
प्रस्तृतं भवति। तथा देवेभ्यः अदितये वेदि-
लक्षणायै पृथिव्यै च स्योनं सुखकरं भवति॥
विस्तीर्णे बर्हिषि देवाः सुखं निषीदन्ति॥ ४॥

॥ अथ पञ्चमी ऋक्॥ ५॥

॥ देवीर्द्वारोऽग्निः॥ ५॥ (देवता)

॥ व्यचस्वतीरुर्विया विश्रयन्तां
पतिभ्यो न जनयः शुम्भमानाः॥
देवीर्द्वारो बृहती विश्वमिन्वा
देवेभ्यो भवत सुप्रायणाः॥ ५॥

॥ पदपाठः॥

॥ व्यचस्वतीः। उर्विया। वि। श्रयन्ताम्।
पतिऽभ्यः। न। जनयः। शुम्भमानाः॥
देवीः। द्वारः। बृहतीः। विश्वऽमिन्वाः
देवेभ्यः। भवत। सुऽप्रायणाः॥ ५॥

॥ सायन भाष्यम्॥

व्यचस्वतीः व्याप्तो व्यापनवत्यः द्वारः। 'वा छन्दसि'
इति पूर्वसवर्णदीर्घः॥ ताः द्वारः देवताः उर्वियाः -

"उरुशब्दात् तृतीयैकवचने" इत्यादियाजी-
करणान्नानुपसङ्ख्यानम् (पा. सू. ७, १, ३९.१)
इति इयादेशः॥ उरुत्वेन विश्रयन्ताम् विशेषेण
आश्रिता भवन्तु॥ तत्र दृष्टान्तः - पतिभ्यः॥ यथा
पतीनामर्थाय सम्भोगकाले शुम्भमानाः शोभ-
मानाः जनयः जायाः विश्रयन्ते। तद्वदस्मिन्कर्मणि
विश्रयन्ताम्। हे बृहतीः महत्यः, हे विश्वमिन्वाः
हविः प्रीणनार्थाः॥ तस्मात्कर्मण्युपपदे अण्।
इति सानुमः। "तत्पुरुषे कृति बहुलम्" इत्यत्र
बहुलवचनात् द्वितीयायाः अपि अलुक्॥
सर्वस्य प्रीणयित्र्यो हे द्वारः देवीः द्वाराभिमानिन्यः
हे देव्यः यूयम् देवेभ्यः देवानामर्थाय सुप्रायणाः
सुप्रगमनाः सुविस्तृताः भवत ॥६॥

॥ अथ सप्तमी ऋक् ॥ ७ ॥

॥ उषासानक्ता अग्निः देवता ॥७॥

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने
॥७॥

॥पदपाठः ५

आ। सुऽस्वयन्ती इति। यजते इति। उपाके इति।
उषसानक्ता। सदताम्। नि। योनौ॥
दिव्ये इति। योषणे इति। बृहती इति।
सुरुक्मे इति सुऽरुक्मे। अधि। श्रियम्।
शुक्रऽपिशम्। दधाने इति॥ ६॥

॥सायनभाष्यम्॥

"सुस्वयन्ती + "अय(तय)पय गतौ" शप्लुग्-
~~[illegible]~~ सर्गस्य सो द्विवचनं छान्दसम्। सुष्ठु अयन्त्यौ
गच्छन्त्यौ। यद्वा। स्वपेर्ण्यन्तस्य वर्णलोपः। सुष्वापयन्त्यौ।
यजते यज्ञे उपाके उपक्रान्ते। उषासानक्ता,
उषाश्च नक्तं च। "द्वन्द्वे "उषासोषसः" इति
(पा.सू. ६,३,३१) इति उषासादेशः, "देवताद्वन्द्वे च"
इति पूर्वोत्तरपदयोर्युगपत् प्रकृतिस्वरत्वम्।
अहोरात्रदेव्यौ, योनौ अस्मिन् यज्ञस्थाने नितरां
नियमेन वा आसदताम्। आसीदताम्॥
सदेर्लुङि लृदित्वात् च्लेरङ्। अदृश्यौ। बृहती,
~~गुणैर्महत्यौ बृहत्यौ~~ दिव्ये, दिविभवे, योषणे
योषिताविव प्रीणयित्र्यौ। यद्वा। योषणे सम्मिते।

परस्परतोऽतिविक्ते, बृहती-गुणैर्महत्सौ, सुरुक्मे
शोभनदीप्ते॥ रुक्मम् शोचतेर्मक्प्रत्यये कुत्वे च
कृते रूपम्॥ शुक्रपिशं शोचमानं रूपं बिभ्रत्यौ।
अग्निं दधाने अग्निकं धारयन्त्यौ॥ ६॥

॥ अथ सप्तमी ऋक्॥ ७॥
॥ दैव्या होतारौ अग्निदेवता॥ ७॥

॥ दैव्या होतारा प्रथमा सुवाचा
मिमाना यज्ञं मनुषो यजध्यै॥
प्रचोदयन्ता विदथेषु कारू
प्राचीनं ज्योतिः प्रदिशा दिशन्ता॥ ७॥

पदपाठः

॥ दैव्या। होतारा। प्रथमा। सुऽवाचा।
मिमाना। यज्ञम्। मनुषः। यजध्यै॥
प्रऽचोदयन्ता। विदथेषु। कारूऽइति।
प्राचीनम्। ज्योतिः। प्रऽदिशा। दिशन्ता॥
॥ ७॥

॥ सायन भाष्यम् ॥

॥ दै आ॥ "देवाद्यञञौ" इति यञ् प्रत्ययः
देवसम्बन्धिनौ। होतारौ-होमनिष्पादकौ-होतृ-
नामकौ वह्न्यादित्यौ अस्मिन् यज्ञे आसादयामि॥
कीदृशौ-प्रथमा-मनुष्यहोतुः पूर्वभाविनौ,
सुवाचा-शोभनस्तोत्रौ, मनुष्यस्य सर्वस्य
यष्टुः यजध्यै यागनिर्वृत्तये॥ यजेस्तुमर्थे
शध्यैन् प्रत्ययः॥ यज्ञं मिमाना निर्मिमानौ
उत्पादयन्तौ, विदथेषु विदन्त्यत्र ऋत्विजः
स्वस्वकर्माणीति विदथा यज्ञाः। तेषु ऋत्विजः,
यजमानांश्च प्रचोदयन्ता प्रेरयन्तौ कारु
स्तुतीनां कर्तारौ, प्राचीनं पूर्वस्यां
दिशि यज्ञस्थलेनास्थितं आहवनीयाख्यं ज्योतिः
प्रदिशा प्रकृष्टेन आदिष्टकर्मणा, यद्वा प्रदिश्य-
मानेन मन्त्रेण दिशन्ता-निर्वदन्तौ॥ ७॥

२

॥ अथ अष्टमी ऋक् ॥(८)

॥ तिस्रो देव्यः इति देवता ॥

॥ आ नौ यज्ञं भारती तूयमे-
त्विळा मनुष्वदिह चेतयन्ती ॥
तिस्रो देवीर्बर्हिरेदं स्योनं
सरस्वती स्वपसः सदन्तु ॥ ८ ॥

॥ पदपाठः ॥

॥ आ । नः । यज्ञम् । भारती । तूयम् । एतु ।
इळा । मनुष्वत् । इह । चेतयन्ती ॥
तिस्रः । देवीः । बर्हिः । आ । इदम् । स्योनम् ।
सरस्वती । सुऽअपसः । सदन्तु ॥ ८ ॥

॥ सायन भाष्यम् ॥

"भारती" भरतः आदित्यः, तस्य स्वभूता दीप्तिः।
"तस्येदम्" इत्यर्थे उत्सादिभ्योऽञ् ।(पा.सू.४।१।८६)
"टिड्ढाणञ्" इति ङीप्। नः अस्मदीयं यज्ञम्।
तूयं क्षिप्रम्। आ एतु आगच्छतु॥ तथा-
मनुष्वत् मनुष्यस्य इदं कर्तव्यमिति
ज्ञानानि तद्वत् चेतयन्ती ज्ञापयन्ती इळा
देवी च इह अस्मिन् कर्मणि आगच्छतु॥

तथा सरस्वतीच स्वपसः सुकर्माणः। अपः इति
कर्मनाम। आप्नोते स्तुनि आपः, कर्माख्यायां
ह्रस्वः, बहुव्रीहौ "आद्युदात्तं द्व्यच्छन्दसि"
इति उत्तरपदाद्युदात्तत्वम्। ताः तिस्रो देवीः
देव्यः स्योनं सुखकरं इदं बर्हिः इमं यज्ञं
आ सदन्तु आसीदन्तु प्राप्नुवन्तु। सदेर्लोटि
सीदादेशाभावः छान्दसः॥ ८॥
"छागस्य पशोर्वपायां" "य इमे" इत्येषाऽनु-
वाक्या। सूत्रितं च- "य इमे द्यावापृथिवी
जनित्री, तन्नस्तुरीपमध्वपोषयित्नु" इति
(आश्व.श्रौ.सू. ३,८)

॥ अथ नवमी ऋक् ॥९॥

॥ त्वष्टा। अग्निर्देवता॥९॥

" य इमे द्यावापृथिवी जनित्री
रूपैरपिंशद् भुवनानि विश्वा।
तमद्य होतरिषितो यजीयान्
देवं त्वष्टारमिह यक्षि विद्वान्॥९॥

॥ पदपाठः

"यः। इमे। द्यावापृथिवी इति। जनित्री इति। रूपैः। अपिंशत्। भुवनानि। विश्वा॥ तम्। अद्य। होतः। इषितः। यजीयान्। देवम्। त्वष्टारम्। इह। यक्षि। विद्वान्॥
॥९॥

॥ सायण भाष्यम्

"यः त्वष्टा देवः जनित्री विश्वस्य जनयित्र्यौ इमे द्यावापृथिवी॥ द्वन्द्वे "दिवो द्यावा" इति द्यावादेशः आद्युदात्तः। पृथिवीशब्दो ङीषन्तत्वेन अन्तोदात्तः, "देवता द्वन्द्वे च," इति पूर्वोत्तर पदयोः प्रकृतिस्वरत्वम्। द्यावापृथिव्यौ रूपैः देवतिर्यङ् मनुष्याद्याकारैः अपिंशत्। रूपवत्या अकरोत्॥ "पिश्" अवयवे। तौदादिकः। "शे मुचादीनाम्" इति नुमागमः॥ तथा विश्वा सर्वाणि भुवनानि भूतजातानि रूपयुक्तान्यकरोत्॥ हे होतः यजीयान् यष्टृतमः विद्वान् सर्वं जानानः त्वं इषितः अस्माभिरध्येषितः प्रार्थितः सन् इह अस्मिन् कर्मणि अद्य अस्मिन् दिने तं त्वष्टारं देवं यक्षि। स्तुतिभिर्हविर्भिर्वा यज पूजय॥ ९॥

२५

॥ दशमी ऋक् ॥ १० ॥

॥ वनस्पतिरग्निर्देवता ॥१०॥

"उपावसृज त्मन्या समञ्जन्
देवानां पाथ ऋतुथा हवींषि ॥
वनस्पतिः शमिता देवो अग्निः
स्वदन्तु हव्यं मधुना घृतेन ॥१०॥

॥ पदपाठः ॥

"उप ऽ अव सृज । त्मन्या । सम् ऽ अञ्जन् ।
देवानाम् । पाथः । ऋतु ऽ था । हवींषि ॥
वनस्पतिः । शमिता । देवः । अग्निः ।
स्वदन्तु । हव्यम् । मधुना । घृतेन ॥१०॥

॥ सायनभाष्यम् "

" "हे वनस्पते यूपं त्मन्या - आत्मशब्दस्य तृतीयैकवचने यादेशः । "मन्त्रेष्वाङ्यादेरात्मनः" इति आकारलोपः ॥ आत्मनैव, ऋतुथा ऋतौ ऋतौ प्राप्तेकाले देवानां अर्थाय, पाथः पशुलक्षणमन्नम् । अन्यानि च हवींषि, समञ्जन् सम्यग् व्यक्तीकुर्वन् उपावसृज - उपगम्य प्रयच्छ ॥ "गतिर्गतौ" इति (पा.सू. ८.१.७०") गतेर्निघातः ॥ किञ्च वनस्पतिः

योऽयं यूपः शमिता ऽतन्नामकः देवः, यद्वा शमित्रः
अग्निः देवः दीप्यमानः आहवनीयाख्योऽग्निश्च
एते त्रयः मधुना मधुरेण घृतेन। यद्वा मधुना
उदकेन प्रोक्षणोपनयनादिगतेन घृतेन च।
इदं हवनयोग्यं स्वदन्तु स्वादु कुर्वन्तु ॥१०॥

अथ अन्तिमा एकादशी ऋक् (११)
॥ स्वाहाकृतीरग्निः अन्तिमा देवता ॥११॥

"सद्यो जातो व्यमिमीत यज्ञ-
मग्निर्देवानामभवत् पुरोगाः॥
अस्य होतुः प्रदिश्यृतस्य वाचि
स्वाहाकृतं हविरदन्तु देवाः॥११॥

॥पदपाठः॥

॥ सद्यः। जातः। वि+ अमिमीत। यज्ञम्।
अग्निः। देवानाम्। अभवत्। पुरःऽगाः॥
अस्य। होतुः। प्रऽदिशि। ऋतस्य। वाचि।
स्वाहाऽकृतम्। हविः। अदन्तु। देवाः॥११॥

॥ सायनभाष्यम् ॥

"अयमग्निः सद्यः तदानीमेव जातः जायमान एव,
यज्ञं अभिमिमीते, विशेषेण निर्मिमीते उत्पादयति ॥
"माङ् माने शब्दे च" जौहोत्यादिकः" अत एवायम्
अग्निः देवानां पुरोगाः प्रथमगामी मुख्यः अभवत्"
"गमेर्विट्प्रत्यये आत्वे च कृते (आत्वम्)" रूपम् ॥
ततः प्रदिशि प्रकृष्टायां दिशि प्राच्याम्, ऋतस्य
आहवनीयात्मनागतस्य, अस्य होतुः होमनिष्पादकस्य -
अग्नेः वाचि अत्र वागाश्रयः आस्यं लक्ष्यते।
वाचि- आस्ये, स्वाहाकृतम् स्वाहाकारेण प्रक्षिप्तं
हविः सर्वे देवाः अदन्तु- भक्षयन्तु ॥
इदं सूक्तं यास्केन सम्यग् व्याख्यायि। (नि० ८, ५-२१)
तदत्रानुसन्धीयताम् ॥ ११ ॥

इति जामदग्न्यमाप्रीसूक्तं समाप्तम्

॥ अस्य आप्रीसूक्तस्य निरुक्तम् ॥

(अ. ८।१।२)

"अथात आप्रियः, आप्रियः कस्मात् - आप्नोतेः प्रीणातेर्वा। आप्रीभिराप्रीणातीति च ब्राह्मणम्॥ २ -

(२)
"इध्मः - तासामिध्मः प्रथमगामी भवति। इध्मः समिन्धनात्॥ १॥ तस्यैषा भवति -॥

"समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः। आ च वह मित्रमहश्चिकित्वान् त्वं दूतः कविरसि प्रचेताः॥"

(व्या)

"समिद्धो अद्य मनुष्यस्य मनुष्यस्य गृहे देवो देवान् यजसि जातवेदः। आ च वह मित्रमहश्चिकित्वान् त्वं दूतः कविरसि प्रचेताः प्रवृद्धचेताः॥ २॥

"यज्ञेध्म इति कात्थक्यः॥ ३॥ अग्निरिति शाकपूणिः॥ ४॥

"तनूनपात्॥ ३॥ तनूनपादाज्यमिति कात्थक्यः। नपादिति अननन्तरायाः प्रजायाः नामधेयम्॥

~~१८~~ १९

निर्णीततमो भवति। गौरत्र तनूरुच्यते।
तता अस्यां भोगाः तस्याः पयो जायते पयस
आज्यं जायते॥ अग्निरिति शाकपूणिः।
"आपोऽत्र तन्व उच्यन्ते। तता अन्तरिक्षे ताभ्यः
ओषधिवनस्पतयो जायन्ते। ओषधिवन-
स्पतिभ्यः एष जायते॥ १॥ तस्यैषा भवति-॥
जिह्व॥
"तनूनपात् पथ ऋतस्य यानान् मध्वा समञ्जन्स्वदया सु
मन्मानि धीभिरुत यज्ञमृन्धन् देवत्रा च कृणुह्यध्वरं नः॥
"तनूनपात पथ ऋतस्य यानान् यज्ञस्य यानान्
मधुना समञ्जन् स्वदय कल्याणजिह्व, मननानि च
नो धीभिर्यज्ञं च समर्धय देवान्नो यज्ञं गमय (राद्ध)
"नराशंसः॥४॥ नराशंसो यज्ञ इति कात्थक्यः॥
नरा अस्मिन् आसीनाः शंसन्ति॥
"अग्निरिति शाकपूणिः नरैः प्रशस्यो भवति॥२॥
तस्यैषा भवति-
"नराशंसस्य महिमानमेषामुपस्तोषाम यजतस्य यज्ञैः॥
ये सुक्रतवः शुचयो धियन्धाः स्वदन्ति देवा उभयानि हव्या॥
(ऋक्० अष्टकं ८।२।१।२)

२

"नराशंसस्य महिमानमेषां उपस्तुमः, यज्ञियस्य यज्ञैर्यः सुकर्माणः शुचयः धियं धारयितारः स्वदयन्तु देवाः उभयानि हवींषि सोमं च इतराणि चेति वा, तान्त्राणि चावापिकानि चेति वा ॥ ३।७॥

"इळः ॥५॥" इळः ईट्टेः स्तुतिकर्मणः। इन्धतेर्वा ॥१॥ तस्यैषा भवति — ॥

"आजुह्वान ईड्यो वन्द्यश्चायाह्यग्ने वसुभिः सजोषाः। त्वं देवानामसि यह्व होता स एनान् यक्षीषितो यजीयान्॥

"आहूयमानः ईळितव्यो वन्दितव्यश्च, ॥२॥ आयाह्यग्ने वसुभिः (सजोषाः) सहजोषण त्वं देवानामसि यह्व होता॥

"यह्व इति महतो नामधेयं यातश्च हूतश्च भवति। स एनान् यक्षीषितो यजीयान्। इषितः प्रेषितः इति वा अधीष्ट इति वा यजीयान् यष्टृतरः॥ २।८)

"बर्हिः॥५॥ बर्हिः परिबर्हणात् ॥१ तस्यैषा भवति —

"प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम्। सुप्रथत वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥४॥

प्राचीनं बर्हिः प्रदिशा पृथिव्याः वस्तोरस्याः
प्रवृज्यते, अग्रे अह्नां बर्हिः पूर्वाह्णे तद् विप्रथते,
वितरं विकीर्णतरमिति वा विस्तीर्णतरमिति वा,
वरीयो वरतरमुरुतरं वा देवेभ्यश्चादितये च स्योनम्
स्योनमिति सुखनाम। स्यतेः अवस्यन्त्येतत्।
सेवितव्यं भवतीति वा ॥ २९ ॥

"द्वारः ॥ ७ ॥ ~~(तासा मेषा भवति~~
"द्वारो जवतेर्वा द्रवतेर्वा वारयतेर्वा ॥ १
"तासा मेषा भवति — ॥

"व्यचस्वतीरुर्विया विश्रयन्तां पतिभ्यो न जनयः शुम्भमानाः
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ ॥
"व्यचनवत्यः उरुत्वेन विश्रयन्ताम्। पतिभ्य इव
जायाः उरु मैथुने धर्मे शुशोभिषमाणाः वरतममङ्गं
उरु, देव्यो द्वारो बृहत्यो महत्यो विश्वमिन्वा
विश्वमाभिरेति यज्ञे। गृहद्वार इति कात्थक्यः ॥ २ ॥
"अग्निरिति शाकपूणिः ॥ ३ ॥ १० ॥
"उषासानक्ता ॥ ८ ॥ उषासानक्ता उषाश्च नक्ता च
उषा व्याख्याता। नक्तेति रात्रिनाम अनक्ति भूतानि ॥

अवश्यायेनापि वा न क्ता । अक्तवर्णा ॥ १ ॥
तस्यैषा भवति – ॥
" आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नियोनौ ॥
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्र पिशं दधाने ॥
" सेष्मीयमाणे इति वा सुष्वापयन्त्यौ – ॥
इति वा, सीदतामिति वा न्यासीदतामिति वा ॥
" यज्ञिये उपक्रान्ते, दिव्ये योषणे बृहत्यौ महत्यौ –
सुरुक्मे सुरोचने अधिदधाने शुक्रपेशसं श्रियम्,
शुक्रं शोचतेर्ज्वलतिकर्मणः ॥ पेश इति रूपनाम,
पिंशते र्विपिंशितं भवति ॥ २ ॥ ११ ॥
" दैव्या होतारा ॥ ६ ॥
दैव्या होतारा दैव्यौ होतारौ, अयं चाग्निरसौ च
मध्यमः ॥ १ ॥ " तस्यैषा भवति – ॥
" दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ॥
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥
" दैव्यौ होतारौ प्रथमौ सुवाचौ निर्मिमानौ । ॥
यज्ञम्, मनुष्यस्य मनुष्यस्य यजनाय प्रचोदयमानौ
यज्ञेषु कर्तारौ पूर्वस्यां दिशि यक्ष्यामिति प्रदिशन्तौ ॥
॥ २ ॥ १२ ॥

"तिस्रो देवी:" ॥१०॥

तिस्रो देवीस्तिस्रो देव्यः ॥ तासामेषाभवति-

"आनो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती ॥

तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु ॥८॥"

"एतु नो यज्ञम् भारती क्षिप्रम् । भरत आदित्यः,

तस्य भाः, इळा च मनुष्वदिह चेतयमाना, तिस्रो

देव्यः, बर्हिरिदं सुखं सरस्वती च सुकर्माणः आसादन्तु.

॥२॥१३॥

"त्वष्टा ॥११॥ त्वष्टा तूर्णमश्नुत इति नैरुक्ताः ।

त्विषेर्वा स्याद्दीप्तिकर्मणः, (वृद्धिकर्मणः) (१)

त्वक्षतेर्वा स्यात् करोतिकर्मणः ॥१९॥ तस्यैषा भवति-

"य इमे द्यावापृथिवी जनित्री रूपैरपिंशद् भुवनानि विश्वा ॥

तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् ॥९॥"

"यः इमे द्यावापृथिव्यौ जनयित्र्यौ रूपैरकरोद्

भूतानि च सर्वाणि, तमद्य होतरिषितो यजीयान्

देवं त्वष्टारमिह यज विद्वान् ॥२॥ माध्यमिकः

त्वष्टेत्याहुः मध्यमे च स्थाने समाम्नातः ॥

अग्निरिति शाकपूणिः ॥३॥१४॥

" तस्यैषा परा भवति - "   उपस्थे "

" आविष्ट्यो वर्धते चारुरासु जिह्मानां मूर्ध्वः स्वयशा
उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रतिजोषयेते "

(ऋक्.सं.अ.१.७, १.७)

" आविरावेदनात् तस्यो वर्धते चारुरासु । चारुचरतेः
जिह्मं जिहीतेः । ऊर्ध्वं उद्धितो भवति । स्वयशाः आत्म-
यशाः । उपस्थ उपस्थाने ॥ " उभे त्वष्टुर्बिभ्यतुर्जायमानात्-
प्रतीची सिंहं प्रति जोषयेते " द्यावापृथिव्याविति वा ॥१॥

" अहो यन्त्रे इति वा । रवा अरणी इति वा प्रत्यक्ते सिंहं
साहनं प्रत्यासेवेते ॥ २॥ ५५ ॥

॥ वनस्पतिः ॥ ४२ ॥ वनस्पतिर्व्याख्यातः ॥

तस्यैषा भवति - ॥

" उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवींषि "
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन "

" उपावसृज - उपावसृज आत्मनाऽऽत्मानं समञ्जन् । ॥(५०)॥
देवानामन्नं ऋतावृतो हवींषि काले काले, वनस्पतिः
शमिता देवो अग्निः इत्येते त्रयः स्वदयन्तु हव्यं मधुना च
घृतेन च ॥ १.२७॥

तत को वनस्पतिः॥१॥ यूप इति कात्थक्यः॥२॥
अग्निरिति शाकपूणिः। तस्यैषा परा भवति॥
"अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन॥
यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे

(ऋक् ३।८।१)

अञ्जन्ति त्वा मध्वरे देवान् कामयमानाः, वनस्पते मधुना दैव्येन च घृतेन च। यदूर्ध्वः स्थास्यसि, द्रविणानि च नो धास्यसि, यद्वा ते कृतः क्षयः मातुरस्या उपस्थे उपस्थाने॥ ३॥१८॥

अग्निरिति शाकपूणिः॥१॥ तस्यैषा परा भवति॥
"देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थम्॥
प्रदक्षिणिद्रशनया नियूय ऋतस्य वक्षि पथिभी रजिष्ठैः॥

(वसिष्ठस्यार्षम्)

"देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण ऋतपर्णापि वा उपमार्थे स्याद् हिरण्यपर्णेति। प्रदिवस्ते अर्थं पुराणस्ते सोऽर्थः यं ते ब्रूमः, स तस्य वह पथिभी रजिष्ठैः ऋजुतमैः रजस्वलतमैः तपिष्ठतमैरिति वा॥८।१९॥

"तस्यैषा परा भवति -"

"वनस्पते रशनया नियूय पिष्टतमया वयुनानि विद्वान्"
वहा देवत्रा दिधिषो हवींषि प्र च दातारममृतेषु वोचः॥

"वनस्पते रशनया नियूय सुरूपतमया वयुनानि विद्वान्
प्रज्ञानानि प्रजानन् वह देवान् यज्ञे दातुः हवींषि
प्रब्रूहि च प्रदातारममृतेषु देवेषु ॥१॥२०॥

" स्वाहाकृतयः ॥४२॥ इति त्रयोदश पदानि"
स्वाहाकृतयः स्वाहेत्येतत् सु आहेति वा, स्वा वाक्
आहेति वा, स्वं प्राहेति वा, स्वाहुतं हविर्जुहोतीति वा॥

" तस्यैषा भवति - ॥

"सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत् पुरोगाः॥
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः॥"

॥ सद्यो जायमानो निरमिमीत यज्ञमग्निः - ॥१॥
देवानामभवत् पुरोगाः तस्य होतुः प्रदिश्यृतस्य
वाचि - आस्ये ~~स्वाहा~~ स्वाहाकृतं हविरदन्तु देवाः ॥२॥

इतीमा आप्री देवता अनुक्रान्ताः ॥ ३ ॥

२७
(विश्वामित्रजमदग्नी)

"प्र सू तो भक्ष मकरं चरावपि
स्तोमं चेमं प्रथमः सूरिरुन्मृजे ॥
सुते सातेन यद्यागमं वाम्
प्रति विश्वामित्र जमदग्नी दमे ॥

(विश्वामित्रजमदग्नी (ऋक्० मं०१०।१६७।४)

॥ पदपाठः ॥

प्र । सु । तः । भक्षम् । अकरम् । चरौ । अपि ।
स्तोमं । च । इमम् । प्रथमः । सूरिः । उत् । मृजे ॥
सुते । सातेन । यदि । आगमम् । वाम् । प्रति
प्रति । विश्वामित्रजमदग्नी इति । दमे ॥ ४ ॥

॥ सायनभाष्यम् ॥ (सूक्तादौ पूर्वावतरणिका)

"तुभ्येदम इति चतुऋचं षोडशं सूक्तम् विश्वामित्र-
जमदग्न्योरार्षम् । जागतमैन्द्रम् । सोमस्य राज्ञः
इत्येषा तृतीया वरुणं विधातृ- अनुमतिधातृ सोम-
वृहस्पती लिङ्गोक्त देवताका । तथाचानुक्रान्तम् ॥
"तुभ्येदं चतुष्कं विश्वामित्रजमदग्नी जागतम्
तृतीया लिङ्गोक्त देवता वा इति ॥ पक्षे इन्द्र एव देवता
अन्ये तु निपातमात्रः इति वाशब्दस्यार्थः गतो

(विनियोगः ॥

॥ सायणभाष्यम् ॥

हे इन्द्र ! प्रसूतः त्वया प्रेरितोऽहं चरौ
चरणानि चरणा वायुक्ते यज्ञे भक्षणं- अपि भक्षणानि
चर्वादिरूपविश्व अकरं त्वदर्थं निष्पादितम्। प्रथमः मुख्यः
सूरिः स्तोताऽहं इमं स्तोमं स्तोत्रं च त्वदर्थं उन्नतं
उन्नतानि संस्करोमि। उच्चारयामीत्यर्थः।
इदानीं इन्द्रः अन्तरिक्षरूपः सन् सूक्तस्य द्रष्टारौ
ऋषी सम्बोधयन् ब्रूते। हे विश्वामित्र जमदग्नी ह
वां युवां प्रति दमे यज्ञगृहे सुते ~~सोमे~~ अभिषुते सोमे
सति सुतेन सोमलक्षणेन धनेन सार्धं यदि यदा
यस्मिन् कस्मिन्नहनि आगमं आगच्छामि। तदा
युवां स्तोत्रं कुरुतम् इत्यर्थः॥ ४ ॥

अथविश्वामित्रस्यजन्मम् ॥

॥ कुशिकस्त्वैषीरथिरिन्द्रतुल्यं पुत्रमिच्छंस्तप-
स्तेपे तस्येन्द्र एव गाथिपुत्रो जज्ञे, गाथिनो विश्वा
मित्रः ॥ ~~इति [illegible]~~ स तृतीयं मण्डलमपश्यत् ॥
इति॰ ऋक् सर्वानुक्रमसूत्रम्: मं-३।१।१)

२

तथा
अथ जमदग्नेः प्रादुर्भावः

२

॥ ३१ ॥

जामदग्न्यस्य आप्रीसूक्तस्य निरुक्त~~भा~~भाष्यम् ॥

॥ तस्य दुर्गाचार्यप्रणीता व्याख्या ॥

२

(निरुक्तम्)

अथात आप्रियः =

"अथात आप्रियः"। आप्रियः इत्यादीनि आप्रीषु निर्वक्तव्यानि, तानि पुनः अमूनि प्रैषिके आप्रीसूक्ते पाठ-क्रमनियमात् विवक्षितक्रमाणीति देव तावद् समाम्नायेऽपि गृह्यमाणत्वात् पाठक्रमप्रयोजनस्य विवक्षितक्रमाण्येव तत्रैव भवन्ति इमान्यपि जातवेदो वैश्वानर प्रभृतीनि किं विवक्षितक्रमाणि उत युगपदभिधानासम्भवात् अर्थतः एषां क्रमः इति ॥

अत्र विवक्षितक्रमाणीति केचित् कथम् इति—

इह तावत् स्थानानि "भूर्भुवः स्वः" इति पाठानुपूर्व्या नियतानीति तत्स्थानानां मध्यमादीनां स एव क्रमो गृह्यते। सः गृह्यमाणो न्याय्यः उत्तरत्रापि अपि च सति च क्रमप्रयोजने "अग्निः पृथिवी स्थानो, यस्मात् अतस्तं प्रथमं व्याख्यास्यामः" इति हेतु-वचनमुपपद्यते, ॥ उत्तरत्र च "तासामिन्द्रः प्रथम-गामी भवति", इति "तेषामश्वः प्रथमगामी भवति" इति ॥

"तेषां रथः प्रथमगामी भवति" इति। तत्र तत्र प्रथमगामी भवतीति वचनं यथा प्रधानमभिधानं पूर्वं समाम्नातमित्यस्य न्यायस्य उपप्रदर्शनार्थमिति लक्ष्यते। इतरथा हि–अविवक्षितक्रमेषु प्रथमगामि वचनमकृत्वैव यत्किञ्चित्पदमुपाददीत॥ तदेतत् पृथिवीस्थाने सर्वत्र क्रमप्रयोजनमुन्नेयं॥ पार्थिवस्य ज्योतिषो यथा अग्निशब्देन प्रसिद्धतमः सम्बन्धः, न तथा जातवेदः शब्देन, न तथा वैश्वानरशब्देन, यथा च वैश्वानरशब्देन न तथा द्रविणोदः शब्देन। तान्येतानि गुणविप्रकर्षात्, प्रसिद्धिविप्रकर्षाच्च अग्निशब्दात् विप्रकृष्यन्ते। इध्मादीनां तु व्यवधानेन अग्न्यभिधानत्वमिति अतितरां विप्रकर्षः। अश्वप्रभृतयस्तु स्थानमात्रमग्नेर्भजन्त इति इध्मप्रभृतिभ्योऽपि विप्रकृष्यन्ते। तेषामपि च उदितप्राणवृत्तयः अश्वशकुनिमण्डूका इति प्रथमाः। अनुदितप्राणवृत्तयस्तु अक्षादयः ते पश्चाद्वान्द्रेभ्यः। इत्येवं सर्वत्र क्रमप्रयोजनमुपेक्ष्यं

“शाकपूणिस्तु पृथिवीनामध्यायेऽपि क्रमस्य स्वयमेव
सर्वत्र क्रमप्रयोजनमाह। तदुक्तं वार्त्तिककारेण।
“क्रमप्रयोजनं नाम्नां शाकपूण्युपलक्षितम्।
प्रकल्पयेदन्यदपि न प्रमाणवदादयेत्॥” इति।
प्रकृतमिदानीमनुवर्ण्यते। इध्मादीनां गुणाभि-
धान सामान्यं किञ्चिदस्ति। यतस्तेनाधिकार-
वचनम् “अथात आप्रियः” इति।

अथ इति विशेषाधिकारे। अतः इति आन-
न्तर्ये। आप्रियः वक्ष्यन्ते इति वाक्यशेषः।
आप्रियः कस्मात् आप्नोतेः प्रीणातेर्वा।
“आप्रीभिराप्रीणाति इति च ब्राह्मणम्॥ २।४॥
“इह कारणादर्शनेऽपि अभिधाननियमो नैरु-
क्तानाम। तदर्थमनुयोक्तृ स आप्रियः कस्मात्
आप्नोतेः प्रीणातेर्वा” इति निरुः।
आप्रियः ऋचः तत्सम्बन्धात् देवता अपि।
“तथा हि दर्शयति – “आप्रीभिराप्रीणाति” इतीमा
अग्निदेवताः इति च। ऋचस्तावद् आप्नुवन्ति।
प्रीणन्ति वा इति आप्रियः। अथ पुनर्देवताः अप
याप्यन्ते आप्रीयन्ते वा इत्याप्रियः॥ ८।४।२॥

"इध्मः तस्य तानूनपातः प्रथमगामी भवति। इध्मः समिन्धनात् ८।१।४
("तानूनपातः (२) प्रथमगामी भवति")
प्रथममन्त्रस्य आप्रीदेवतापदसमाम्नाये इत्थमिति
प्रथमगामी, कस्मात् ? तत्पूर्वकत्वादिड्यायाः, उत्तरेषु -
तान्च तनूनपान्नाराशंसयोरन्यतरस्य ॥८।५।१॥
तस्यैषा भवति- ॥ तस्य इध्मस्य समिधना
यस्य "गाथा" प्राधान्यस्तुतिः "भवति" अस्यैताः ॥
"समिद्धो अद्य मनुषो दुरोणे० ऋक् (१)
"समिद्धो अद्य मनुषस्य मनुष्यस्य गृहे देवो
देवान्यजसि जातवेदः आ च वह मित्रमहः
चिकित्वान्त्वं दूतः कविरसि प्रचेताः॥
प्रवृद्धचेताः ॥२॥
"समिद्धो अद्य मनुषो दुरोणे (ऋ. सं. ८।६।८।१) इति
अस्मदग्ने सर्वेभ्यः त्रैष्टुभः सूक्तमेवेदं आग्नेयं
यास्कः॥ हे इध्म ! यस्त्वं "समिद्धः" सन्दीप्तः, "अद्य"
अस्मिन् विशिष्टे यजनीयेऽहनि "मनुषः" मनुष्यस्य
मनुष्यस्य" समानेऽहनि प्रवृत्तयागानां त्रैवर्णिकानाम्-

"दुरोणे" यज्ञगृहे "देवः" दाता हविषां हेतुकर्तृ-
त्वेन, "देवः" दीप्तो वा, द्योतनो वा, "देवान्" दानादिगुण-
युक्तान् यातान् हेतुकर्तृत्वेन यागे अङ्गभावमुपगच्छन्
"यजसि" हे "जातवेदः"! "जातवेदस उपचार इति
तदभिधानेन सम्बोध्यते। इत्याहि मध्यस्थैषु कोशलं
तदभिधानप्राप्तिः। अथवा जातवेदाः अपि त्वद् ते
अनभिव्यक्तस्वशक्तिः त्वदुपचारत्वात् अशक्तप्रायं
यष्टुम्। तस्मात् जातवेदास्त्वदाधारो यजतीयत्।
तत त्वमेव यजसीत्युच्यसे, (उच्यते) (१)
अस्मात् कदापि प्रातस्मिन्नहनि हे "मित्रमहः" मित्राणां
पूजयितः! निसहमप्युपेक्षमाणः उपकारवृत्तो यज-
मानानाम् "चिकित्वान्" जानानः, "आ च वह"
आवहयन्, देवान् आहूय च प्रातान् यज, तथा अस्मिन्
कर्मणि ज्वलन् अङ्गभावमुपेहि। यथा प्रातस्मिन् कर्मणि
हविः प्रति जिघृक्षन्तः अङ्गभावमीयुर्देवाः। अपि च
नैन दातिचित्रम्। यदेवमस्मात्कमास्मिन् कर्माणि वर्तेथाः।
किं कारणं? यतो ब्रूमः "त्वं दूतः कविरसि प्रचेताः" (इति)
आन्यावेशादग्नि र्यदपेक्ष्योच्यसे "त्वमेव दूतः" —

सर्वयजमानानां बसूर्विक वा तद्देवता यागस्य,
"कविः" क्रान्तदर्शनः क्रान्तप्रकाशः सर्वत्र।
"प्रचेताः" प्रकृष्टज्ञानः। यस्मात् त्वं ऋत्विक्
यजमानानां साधुदृष्टेहेतुः। तस्य तव युक्तम्
अस्माकं आहूय देवान् यष्टुमिममर्वे ब्रूमहे। आहूय च
देवान् यजस्व "(इति ८।१८।२)

२

"यज्ञेध्म इति कात्थक्यः" ॥२॥

"यज्ञेध्म इति कात्थक्यः" कात्थकस्य पुत्रः कात्थक्यः
आचार्यः मन्यते। योऽयमिध्मः आधीयते प्रति
प्रणवमिध्मो यज्ञे समवायमिति। ननु एतस्मिन्
मन्त्रे न तस्य लिङ्गं नास्ति,? सत्यं- नास्ति साक्षात्
प्रैषे तु "समिध्यः प्रेष्य" इति श्रूयते, युक्तं च
तदर्थमेव प्रेष्यते स एवेज्यते। तस्मात् समिधामेव
इध्मभावमुपगतानां अग्निनामन्द्रानां समुदाया-
पेक्षामिध्मम्। अनद्दित माभिधानमाप्रीगीतम्।
"समिद्धो अद्य" इति। समिध एवेमा इध्यन्ते इति स्फुटं
प्रैषिके होत्रे समिधो यजेति प्रेषितो होता —

"समिधः समिधो अग्न आज्यस्य व्यन्तु"
इति वषट् करोति। तस्माद् युक्तं यत्कात्थक्यो
मन्यते यज्ञेध्म इति॥ ८।५।२॥
"अग्निरिति शाकपूणिः –॥४॥
अथ पुनः कथं मन्यते अत आह "अग्निरिति-
शाकपूणिः (इति) स पुनः कया उपपत्त्या अग्निं
मन्यते? आरादुपकारित्वात्। प्रैषस्य सान्निपत्योप-
कारित्वाच्च। यजतावाप्रियाः यदाप्री रूपम्।
तद्बलवत्। किञ्च। पुनराप्रियो रूपम्? –
अग्न्यर्थता कर्मणः। इति शृणु-
"समिद्धो अद्य मनुषो दुरोणे०- प्रश्नोः॥ १॥
इति सर्वाण्येतानि अभिधानानि कर्माणि च
अगौणान्यग्निपक्षे। गौणानीध्मपक्षे॥"
"गौणमुख्ययोश्च मुख्ये कार्यसम्प्रत्ययः॥" इति न्याया-
तस्मादप्रच्युतस्वरूपायाः आप्रियो यजतावुपकार-
बाहुल्यात् ~~आग्ने~~ आग्नेयत्वाच्च प्रयाजानां अग्निरेवाय-
मनया आप्रिया इज्यन्ते इति शाकपूणि मन्यते॥

यास्कस्यापि चैतद् देवाभिमतम्; "आग्नेया इति तु स्थितिः" इति अधिकरणान्ते हि वक्ष्यति । प्रावेतद्धि अग्निरित्येतदेव समाम्नातम् अम्नातेऽन्य न इध्मः" इति । नैवम् । कस्मात् "समिद्धो अद्य" इति पादस्यास्य मन्त्रे लिङ्गं नास्त्यनु-अग्निशब्दः । अतः अस्य समाम्नानम् ॥ पौनरुक्त्यदोषाच्च । तदिध्मशब्देऽपि समाम्नानम् इति चेत् तदपि क्रियाप्रियं नास्तीति न, प्रत्येकं समाम्नानात् । क्रियाविशेषवाच्यत्वाच्च च अस्माकं देवान् यज चेति । स प्राणोऽग्निः - समित्कल्पापरिमितमहत्त्वेनाभिसम्पन्नः तदस्यातानुपपत्तेः, तेन इध्माभिधानेनेड्यते इति इध्मशब्दः समाम्नातो नाग्निशब्द इति । सर्वत्र शाकपूणेरेव मा प्री ~~[illegible]~~ तु अन्यथा-न्यभिधानानि ॥

२

शाकपूणिपक्षे मन्त्रयोजना, हे भगवन् अग्ने "समिद्धः" यः त्वं सन्दीप्तः "अद्य" अस्मिन्नहनि "मनुषः" मनुष्यस्य "दुरोणे" "यजमानगृहे" देवः " दीप्यमानोऽसि वर्तमानः । ~~[illegible]~~ यातो

"देवान्" दातॄन् दीप्तान् वा "यजासि जातवेदः" -
हविषा यजमानानां जातप्रज्ञान! स त्वमस्माकमपि
हे "मित्रमहः" मित्राणामुपकारप्रवृत्त! "चिकित्वान्"
जानानः स्वमधिकारम्। अथ यद्देवान् यजश्चेति॥
किमहमेवम्! ब्रूमहे - यस्मात् त्वमेव "दूतः" सर्व
यजमानानां भवसि। "कविः" क्रान्तदर्शनः। "प्रचेताः"
"प्रवृद्धचेताः" प्रवृद्धप्रज्ञानः इति ॥ ८।५।४॥

२

" तनूनपात् ॥२॥

" तनूनपाद् आज्यम् (भवति) इति कात्थक्यः ॥
तनूनपादित्यनन्तरायाः प्रजायाः नामधेयम्।
निर्णततमा भवति॥ गौरत्र तनूरुच्यते।
तता अस्यां भोगाः तस्याः पयो जायते पयसः
आज्यम् जायते।

" अग्निरिति शाकपूणिः॥ आपोऽत्र तन्व उच्यन्ते
तता अन्तरिक्षे, ताभ्यः ओषधिवनस्पतयो
जायन्ते। ओषधिवनस्पतिभ्यः एषः जायते ॥७॥

२

"तनूनपात्"(३) इति निर्वचनस्य । तत् पुनरेवम्
"आज्यम्" इति "कात्थक्यः" "अग्निरिति शाकपूणिः
यथा तावदाज्यं तथा निरुच्यते "नपात्" इति
अनन्तरायाः प्रजायाः नामधेयम्" यास्कः
अनन्तरा । पुत्रा एव भवति । अननन्तरा ।
पौत्रा इत्यर्थः ॥ किं कारणम् ? सा हि "निर्णततमा
भवति" कथम् ? पुत्रः तावत् पितुः नीचैर्नतो
भवति । ततोऽपि नीचैर्नततमः पौत्रः । तत्रैतस्मिन्
पक्षे यः "तनूः" शब्दः पूर्वपदं "तनूनपात्" शब्दस्य,
तेन "गौः उच्यते" । सा कस्मात् ? "तता अस्यां
भोगाः" दध्यादयः । ततः किम् ? "तस्याः पयो
जायते" तस्याः पुत्रः पयः । "पयसः आज्यं जायते"
तस्मात् तस्याः पौत्रः । एवं गौः तन्वा एतस्याः
नपात् आज्यम् । तस्मात् "तनूनपात्"
"अग्निपक्षे "आपः" अत्र "अस्मिन् अग्नेः तनूनपाते"
"तन्वः" उच्यन्ते । ताः कस्मात् ? "तता अन्तरिक्षे" ।
ततः किम् ? ताभ्यः ओषधिवनस्पतयो जायन्ते"
"ओषधिवनस्पतिभ्यः "तेजः" अग्निः जायते, तस्मात्
अयमपि "~~तनूनपात्~~" "पौत्रः" ॥

"तस्यैषा भवति -" "तस्य" "तनूनपातः आज्यस्य अग्नेर्वा प्राधान्य स्तुतिः "एषा भवति" इति।

"तनूनपात् पथ ऋतस्य यानान् ॰ अध्वरेणः" २।
"तनूनपात् पथ ऋतस्य यानान् यज्ञस्य यानान् मधुना समञ्जन् स्वदय कल्याण जिह्व, मननानि नो धीभिः यज्ञं च समर्धय देवान् नो यज्ञं गमय।
(२।६॥

"तनूनपात् पथ ऋतस्य" इति। हे "तनूनपात्" आज्य-त्वमुच्यसे। भवान् "पथः" मार्गान् सर्वान् "ऋतस्य" यज्ञस्य "यानान्" हविर्भिः, यज्ञे यान्यु सर्पन्ति "तानि "मधुना" मधुरेण स्वादेन "समञ्जन्" सम्प्रक्षयन् "स्वदय" स्वादुतामापादय" हे "जुह्वे !" जिह्वया हि ते एतदेव कुर्वन् "मननानि" मननानि "यानि च वयं मन्यामहे अर्थ वस्तूनि ध्रुवाण्येतानि नः स्युरिति तानि स्वाभिः "धीभिः" स्वैः कर्मभिः अभिधारणा-लङ्करणादिभिः "ऋन्धन्" संसाधयन् स्वगुणैः ऋध कुर्वन् समर्धय सम्पादय॥ अपि च एवं कुर्वन् एवं यज्ञं "समर्धय" सम्पादय ॥ या काश्चिदपि दुष्पद्यते यज्ञस्य-

तां प्रायश्चित्तेना दुःभावमुपगच्छन् "गमय"
" देवत्रा " देवान्" प्रति, स्विष्टमध्वरमस्माकं
च कुरुष्व सर्वः पदार्थः दाशास्महे वत्तः प-
वा अग्निरिति शाकपूणि मते हे भगवन् अग्ने!
"तनूनपात्" त्वं ऋतान् "पथः" ऋतस्य "यज्ञस्य -
"यानान्" हवींषि "मध्वा" मधुरेण पाकत्वेनरसेन
"समञ्जन्" समञ्जयन् "स्वदय" स्वदीकुरु।
हे "सुजिह्व" सर्वाः! अथवा हे सुवाक्, दावान्यैव
कुरु, अस्माभिः प्रदत्तान्यर्थवस्तूनि स्वःसंस्थापय
"यज्ञं ऋन्धन्" समर्धयन् स्वस्मान्यर्थान्
" देवत्रा " देवप्राप्तिं (देवप्रति कुं) कुरु
इत्येतदाशास्महे वयं तत्र इति ॥ ऋ१०।१२४

नराशंसः ॥४॥ नराशंसः शंसोयं ह
इति कात्थक्यः॥ नरा अस्मिन्नासीनाः
शंसन्तिति ॥ १ ॥
"नराशंसः" (४) "यज्ञ इति कात्थक्यः॥ कस्मात्
"नराः" अस्मिन्नासीनाः शंसन्ति", नराशब्दः

पूर्वपदम्। आसीना नरा अस्य मध्यमः शंसते –
उत्तरपदम्॥ अयमर्थः "नराः" मनुष्याः "अस्मिन्"
"आसीनाः" उपविष्टाः "शंसन्ति" इति "नराशंसः॥
(८।७।१)

"अग्निरिति शाकपूणिः॥ नरैः प्रशस्यो भवति॥"
"अग्निरिति शाकपूणिः॥ सः कस्मात्? "नरैः"
"प्रशस्यः" "स्तुतः" भवति॥ (८।७।२)

तस्यैषा भवति – ॥ तस्य नराशंसस्य "[illegible]
प्राधान्यस्तुतिः॥

"नराशंसस्य महिमानमेषाम्॰ उभयानि हव्या॥

॥नराशंसस्य महिमानमेषामुपस्तुमः, यज्ञियस्य
यज्ञे ये सुकर्माणः शुचयो धियं धारयितारः
स्वदयन्तु देवाः उभयानि हवींषि सोमं च
इतराणि चेति वा तान्त्राणि चावापिकानि
चेति वा॥ ३।७॥

"नराशंसस्य महिमानमेषाम्" (ऋ॰सं॰ ७,२,१,२)
वर्तमान एव कर्मणि ब्रवीति, योऽयमेषामभिमत
फलदाता नराणां नराशंसो यज्ञः। इन्द्रदेवता-
समागमकः प्रयोगः, तस्य अग्निर्दाता, तदयमग्नि-
देवताविशेषः जगदुत्सर्गेस्यानुग्रहशीलम्।
"नराशंसस्य" एवं "उपस्तोषाम" "उपस्तुमः"
उपगम्य एतस्य "महिमानम्" महात्म्यं विभूतिं
"स्तुमः" अभिकीर्तयामः। "यजतस्य" —
"यज्ञियस्य" यजनसाधयितुः, प्रयोक्तुः
अभिमत फल सम्पादयितुः, "यज्ञैः" कर्मभिः
युक्ताः उपस्तुमः, यदेवमस्मिन् उपस्तुत-
महिम्नि नराशंसे यज्ञे किमभ्यस्तु इत्याशास्महे।
"ये सुक्रतवः" सकर्माणः जगदनुग्रह प्रवृत्ताः
शुचयः निर्मलतरप्रायाः "धियं धाः" स्वाधि-
कार युक्तानां कर्मणाम् अनु वि-धारयितारः।
प्रज्ञानां यज्ञानां वा। एवमादिगुणयुक्ताः
"देवाः" ते "स्वदन्ति" आस्वादयन्तु"।
[illegible]वानि "इमा" हवींषि "उभयानि"

यदि सौमिकः पशुः ततः "स्तोकांश्च" हुतशेषांश्च"
पशुपुरोडाशवपाप्रभृतीनि। अथ पृथक्
सोमात्। ततः "तन्त्राणि" प्रयाजाद्युपयाज-
स्विष्टकृत्प्रभृतीनि, "आवापकानि च प्रधान-
हवींषि इत्येतदाशास्महे।

"अग्निरिति शाकपूणिः" — योऽयं जाताग्नि-
मतोपकारकारी नराणां प्रशस्यः नराशंसोऽग्निः, तस्य
वयं "उपस्तोतारः" उपस्तुमः "महिमानं" "यजतस्य"
यज्ञसम्पादयितुः "यज्ञैः" कर्मभिः दानैर्वा संयुक्ताः
तस्मिन्नुपस्तुतमहिम्नि नराशंसेऽग्नौ हुतानि यै"
"सुक्रतवः" देवाः "शुचयः" धियंधाः" ते एतानि
अस्माकं हवींषि "आस्वादयन्तु" इत्याशास्महे।
॥८।७।३॥

"इळः"॥ इळा। ईळ ईडः स्तुतिकर्मणः "इन्धतेर्वा"
॥१५

"इळः" (इळा) "अग्निः"॥ ~~[illegible]~~ सः पुनरयम् "ईट्टे": स्तुति-
कर्मणः "स्तूयते ह्यसौ," "इन्धते वा" दीप्त्यर्थस्य।
(तिक्याप्युक्तो ह्यसौ" ८।८।१)

"तस्यैषा भवति -" तस्य एषा प्राप्याय-स्तुतिः "भवति"।

"आजुह्वान ईड्यो वन्द्यश्च॰ यजीयान्" ऋ०

"आहूयमानः ईळितश्च वन्दितश्च वन्दित अश्वायाह्यग्ने वसुभिः सह जोषणः त्वं देवानामसि यह्व होता।

यह्व इति महतो नामधेयं यातश्च भवति। स एनान् यक्षीष्ठिवो यजीयान्। इविः प्रेषित इति वा अधीष्ट इति वा यजीयान् यष्टृतरः॥ २।८॥

(इति॥

"आजुह्वान ईड्यो वन्द्यश्च॰(ऋ-८,५,८,३)

हे भगवन्! अग्ने! यः त्वं "ईड्यः" वन्द्यश्च" सर्वलोकस्य "ईड्यः" दीपनार्हः हविर्भिः-आज्यादिभिः" वन्द्यः" स्तुत्यः। स त्वं "आजुह्वानः" आहूयमानः" एतस्मिन् कर्मणि अस्माभिः, "वसुभिः" "सजोषाः सहजोषणः। समानप्रीतिर्भूत्वा "आयाहि" कस्मात् एवं ब्रूमहे त्वं इवः। यस्मात् हे "यह्व" "महन्" त्वम्" असि होता देवानाम् आह्वाता॥

"स्तः" त्वं अस्माभिः "इषितः प्रेषितः, उष्णीषो वा
अध्येषितो होतृत्वे स्थित वा अस्माकम् "तानान्"
देवान् (यतियान्) यज्ञ इत्येवं ब्रूहि। यस्मात्
"यजीयान्" असि, यष्टृतम मनुष्यहोतुरिति।

—

इह ईड्यः इति अग्नेरवधानेन ततः।। तस्मिन् मन्त्रे
एकस्यश्रुतत्वात्, लोके के पुनर्होत्रे "ईळो अग्न-
आज्यस्य व्यन्तु" इति बहुवचन युक्तादारआवात्
व्यन्ति ये तस्मात् "ईळः" इत्येतस्यापि बहुवचन-
मेव "ईळो व्यन्तु" तच्च पुनरन्याभिधानम्।
अन्नं च पुनरोषधय एव, ताश्च पृथिवी स्थानाः
इति अग्निं भजन्ते, तदाकाङ्क्ष्य भक्ति रिड्यत इति
तत्र बहुवचनं अतिसमाधानं औपचारिकं
अग्नेर्वचारणात्। उक्तं च "योऽयमृजीषे
(ऽसे) पृथिव्यामग्निरन्तरौषधिवनस्पतिषु
आरसु तदुन्नियन्ति सर्वगणं सर्वनामानम्
इति" तस्मादुपपन्नत इति ।।२।।१।।२ ।।

—

"बर्हिः॥ ८॥ बर्हिः परि बर्हणात् ॥२॥

"बर्हिः (८) इति निर्वचनम्। तत्पुनरेतत् प्रसिद्धमेव कुशाख्यं यज्ञाङ्गम्। तत् कस्माद् "बर्हिः"? इति उच्यते "परिबर्हणात्" परिच्छेदनात् यत्नूर्हि तद् भवति। परिवृढं वा॥ ८।१।२॥

"तस्यैषा भवति - ॥ तस्य ॥ ता बर्हिषः - प्राधान्य स्तुतिः" भवति॥

(नि.) "प्राचीनं बर्हिः प्रदिशा पृथिव्याः॰ स्योनम् ॥४

॥ प्राचीनं बर्हिः प्रदिशा पृथिव्या वसनायास्याः प्रवृज्यते। अग्रे अन्हाम्। बर्हिः पूर्वाह्णे तद् वि प्रथते वितरं विकीर्णतरमिति वा विस्तीर्णतरमिति वा वरीयो वरतरमुरुतरं वा देवेभ्यश्चादितये च स्योनम्॥

स्योनमिति सुखनाम स्यतेः स्वस्यन्त्येतत्। सेवितव्यम् भवतीति वा॥२८४॥

"प्राचीनं बर्हिः" (ऋ॰ १०।११०।४) इति॥ प्राच्यां दिशि यच्छिद्यते गतं जातं प्रागग्रं वा यत् स्तीर्यते तद् भवति "प्राचीनम्"॥

किं पुनस्तत् "बर्हिः" प्रवृज्यते प्राच्छिद्यते लूयते, अथवा "प्रवृज्यते" प्रस्तीर्यते।
किं पुनरेवमेव स्वमनोषिकया(?) ऽनेसुच्यते।
"प्रदिशा" विधिवाक्येन प्रागुदग्वा बर्हिः छिनत्तीति, सामर्थ्यात्। अथवा, "प्रदिशा" प्रस्तरणमन्त्रेण "देवस्य त्वा" इत्यनेन, स्तरणपक्षेऽपि "प्राचीनं बर्हिः स्तृणाति" इति विधिवाक्यम्। "ऊर्णम्रदा विप्रथस्व" इति मन्त्रः (ऋ. ३।४।२०।४)
किमर्थं पुनः तत् प्रवृज्यते? "पृथिव्या वस्तोः अस्याः"; पृथिवी वेदी, तस्याः वस्तोः वसनाय आच्छादनाय। कदाच पुनस्तद् प्रवृज्यते? "अग्रे अन्हाम्" पूर्वाह्णे, तदा हि प्रवृज्यते धर्मस्तरणाय लवनं वा। तत् प्रत्यक्षं प्रवृत्तं प्रस्तीर्यमाणं विस्तीर्यमाणं वा किं प्रथते।
"वितरं विस्तीर्णतरं" "वितर्णितमम्" वरीयः "वरतमम्" अन्येभ्यश्च यज्ञेभ्योऽप्युरुतरम्। तदाधार हविषाम्। "उरुतरं वा" बहुतरं वा "किमर्थं तत् प्रवृज्यते विप्रथते वा?"

कथं नाम?

"देवेभ्यः" "अदितये च" "स्योनम्" सुखं "स्यादिति।
हविर्भ्यादि संगृहीतत्वात् कर्मणोः देवानां हविर्दा-
तॄणां यजमानानां अभीप्सितेन फलेन योगं भवति।
तत् सुखम्।" "अदितये" "पृथिव्यै" बर्हिर्भ्यादि
संगृहीतत्वात् कर्मणः स्याद् तद्द्वारेण वृद्धिर्भवति।
ततः ओषधिप्ररोहः तत्सुखं नाम॥

—

नात्र ज्ञानीति अग्निरिति। तेन यज्ञाङ्गं देवताभिमतम्
तत्त्वदर्शनमपि अस्य स्वार्थस्य च तद्द्वारेणैव यजमानेन
अग्निः स्तूयते। पृथिव्यायतनत्वात् तस्य॥
अपरे पुनः अग्निवदपि योजयन्ति मन्त्रार्थं इत्यतः॥
तत्पक्षे बर्हिरिति सम्बोधनम्। प्राग् उच्यते
प्रणीयते इति च "प्राचीनं" बर्हिः" प्रवृद्ध महतो
यारवं ज्योतिः "प्रवृद्ध्यते" "प्रणीयते" तत् पुनः
"प्रदिशः" वचनेन "प्राच्यनुधारन्तीति"
"पृथिव्याः" वक्ता वचनस्य "अग्निर्नैव बर्हिर्वेदि-
रनाग्निका भवति॥" "अग्ने अन्हाक्" पूर्वाह्णे'
तद् विविधं "प्रयते" सायंप्रदोषपात् प

९९१

आत्यभागमाकाशादिषु च विस्तीर्णतरां विविक्ततरां
प्रथते। "वरीयः" 'वरतरम्' अन्येभ्योऽस्योतिभ्यः,
"उरुतरं" महत्तरं वा देवेभ्यः यजमानेभ्यः इतरे
भ्यो वा "अदितये" च 'पृथिव्यै' कथं नाम स्यात्
स्यादिति॥

"स्योनम्" इति सुखनाम। स्यतेर्धातोः अवपूर्वात्।
त देवाहि "अवस्यन्ति" अवस्यन्ति निवसन्ति
प्राणिनः। "सेवितव्यं भवतीति वा" तद्धि सर्वस्य
सेवनीयं भवति॥ ८।१२॥

"द्वारः" ॥७॥ द्वारो जवतेर्वा द्रवतेर्वा
वारयतेर्वा ॥१॥

"द्वारः" (७) इति निर्वक्तव्यम्। "यज्ञे गृहद्वार इति
कात्थक्यः॥ ताः पुनरेताः "जवतेर्वा" जवन्ति
हि ताभिः। "द्रवतेर्वा" ध्यात्वस्यत्वनर्थैकि तथा
"वारयतेर्वा" वारणीया हि द्वारादेव निवार्यन्ते।
"तासामेषा भवति—" ॥
तासामेषा प्राधान्येन स्तुतिर्भवति॥

॥५॥

"व्यचस्वतीरुर्विया विश्रयन्ताम्० सुप्रायणाः॥

"अञ्चनवत्यः उरुत्वेन विश्रयन्ताम् पतिभ्य इव जायाः उरु मैथुने धर्मे शुशोभिषमाणाः वरतमं मन्नः, मूरु देव्यो द्वारो बृहत्यो महत्यो विश्व-मिन्वाः विश्वमाभिरेति यज्ञे॥

"गृहद्वार इति कात्थक्यः॥२॥

"व्यचस्वतीः०" (ऋक्.सं. ८।६।८।५)

याः द्वाराः विविधेनाञ्चनेन गमनेन युज्यन्ते, "व्यचस्वतीः" ताः। किं कुर्वन्तु? "उर्विया" उरुत्वेन महत्वेन "विश्रयन्ताम्" कथम्? "पतिभ्यो न जनयः" पतिभ्य इव जायाः "यथा पतिभ्यो जायाः "उरु मैथुने धर्मे" विवृण्वन्ति", "शुशो-भिषमाणाः" शोभयितुमिच्छमानाः प्रहृष्टा एवं विश्रयन्ताम्। इदानीं मन्त्रोऽवर्णः प्रत्यक्षकृतः याः यूयं अञ्चनवत्यः एवं विश्रयध्वे व ता ब्रवीमि, हे "देव्यः" दानक्रिया हेतुभूताः! "द्वारः बृहत्यः महत्यः विश्वम् इन्वाः "विश्वम्" सर्वं "आभिः "एति" यज्ञोपकरणमिति विश्वमिन्वाः यूयमुपसर्पत

१ देवेभ्यः " एतेभ्यः हविर्दातृभ्यः ऋत्विग्भ्यः यजमानेभ्यः इतरेभ्यो वा "सुप्रायणाः सुप्रगमनाः " भवत " इत्याशास्महे ॥

"अग्निरिति शाकपूणिः ॥ ३। १० ॥

"अग्नि रिति शाकपूणिः " तस्य योजना - अग्न्यर्चिषो द्वारः। जवनात् द्रवणाद् वा। हवींषि याभिर्जवन्तो द्रवन्ति वा, वारयन्ति (घ्नन्ति) वा रक्षः प्रभृतीनि द्वारः। "व्यचस्वतीः" या यावाः विचिव्येनाभ्यनेन तद्रसः। अग्न्यर्चिषः। ताः उरुत्वेन "विश्रयन्ताम्। कथम्? "पतिभ्य इव जायाः" उरु मैथुने धर्मे" शोभमाना मानाः यायूयं विवि्येनाभ्यनेन तद्रसः। यास्मै वं विश्रयध्वे। ततो ब्रवीमि हे "देव्यः बृहत्यः विश्वमिन्वाः" सर्वं हविर्याभिर्जवन्ति। ताः यूयं अस्य हविषः " सुप्रायणाः " सुप्रगमनाः "भवत" इति ॥८।१०॥३५

उषासानक्ता - ॥८॥

उषासानक्ता- उषाश्च नक्ता च उषा आरसाता। नक्तेति रात्रिनाम, अनक्ति भूतानि अवश्यायेनाििप वा नक्ता। अक्तवर्णा ॥१५

"उषासानक्ता" (८) इति एकपदम्। अस्य
विग्रहः "उषाश्च नक्ता च" अत्र "उषा आख्याता"
"उच्छन्तीति सती" इति। "नक्तेति रात्रिनाम"।
तत् कस्मात्? "अनक्ति" क्लेदयति "भूतानि"
"अवश्यायेनेति" इति। अवश्यमेव दायन्तीति
अवश्याया प्रुष्वाः। अनक्ते रकारलोपे नक्ता।
"अपि वा नक्ता अव्यक्तवर्णा" नकारः प्रति
षेधे न उक्ता न व्यक्ता। अनक्ता। यथा अहः
सर्वं प्राणिव्यक्तरूपं भवति। न तथा रात्रिः।
(८।११।२)

२

तयोरेषा (भवति।।
" ~~[struck out]~~ भवति- ।। तयोः एषा प्राधान्यस्तुतिः-
"आ सुष्वयन्ती यजते उपाके। शुक्रपिशं दधाने" ऋ ५
" स्मेष्मीयमाणे इति वा सुष्वापयन्त्याविति वा
सीदतामिति वा न्यसीदतामिति वा। यज्ञिये
उपक्रान्ते, दिव्ये योषणे बृहत्यौ महत्यौ सुरुक्मे
सुरोचने अधिदधाने शुक्रपेशसं श्रियम्"
शुक्रं शोचते र्ज्वलति कर्मणः पेश इति रूपनाम।
पिंशतेर्विपिंशितं भवति।। २।।११.५

२

"आसुष्वयन्ती"० (ऋ.सं. १०।११०।६) इति"
"आसुष्वयन्ती" सेष्वीयमाणे" परस्परं सयमाने।
अथवा "सुष्वापयन्त्यौ" सुखं जनान् स्वापयन्त्यौ।
"यजते" हेतुकर्तृत्वेन यजते "यष्टिसे" यज्ञसम्पाद-
यित्र्यौ। "उपाके। उपक्रान्ते। उपगम्य इतरेतरं
क्रान्ते प्रशस्ये। "दिव्ये" दिविजे द्योतने। "योषणे"
सम्मिश्रे परस्परतः "बृहती, बृहत्यौ महत्यौ,
सुरुक्मे, सुरोचने" सुदीप्ते। ये एते रुक्मादि-
गुणयुक्ते उषासानक्ते" अधिश्रियम्' श्रियम्
"अधिदधाने" उपरि स्थापयन्त्यौ। "शुक्रपिशम्'
"शुक्रपेशसम्" शुक्ररूपां श्रियम्। "आसदताम्"
"आसीदताम्" एतस्मिन् स्वे "योनौ"। आङ्कारस्य
उत्कृष्यते उपसर्गस्याहि किं यापदेन सामर्थ्यम्।
"न्यासीदतामिति" नियमेन आसीदतामिति,
निरन्तर पद्धस्थो ऽप्युपकृष्यते तेनैव क्रिया
पदेन। नि शब्दश्चोन्तर पदे वा पादपूरणः।
"न श्रीवीसान्निरिति। येन द्विलानुपपत्तिरिति
केचित्॥"

अथ पुनर्निर्वर्णयन्ते - उभा अन्तेदीप्तिः, नक्ता आहुति दीप्तिः, विवासयति तमः। आहुतिः अनक्त्याऽऽस्येनाते प्राते दीप्ता हुती सुष्ठु स्मयमानेऽव "यजते" - "यजिये" यज्ञसम्पादायित्यौ, "उपाके" - "उपक्रान्ते" अपस्वरतः। "दिवे" द्योतने परस्परा- श्रयणात्। "योषणे" मिश्रीभूते। "बृहती" बृहत्यौ महत्यौ। "सुरुक्मे" सुरोचने सुष्ठु रोचने। "अधिदधाने" "शुक्रपिशम्" शुक्रपेशसम्। प्रतस्मिन् यजमाने, "श्रियम्" आसदताम् "आसी- दताम्" नियमेन आधिक्यं वा इत्याशास्महे॥ "पेश" इति रूपनाम, "पिंशतेर्धातोः, तद्धि - "विपिशितं भवति" - विकसितं भवति। यावदाश्रय- वातत्वाविलात् विनिहितमिति केचित् अन्याश्रितम्- (८।१९।२) "दैव्या होतारा ५६॥ "दैव्या होतारा दैव्यौ होतारौ - अयं चाग्निः असौ च मध्यमः॥१॥ "दैव्या होतारा" (९) इतिवक्तव्यम्। "दैव्यौ होतारौ" इति शब्दसमाधिः। "अयं चाग्निरसौ च मध्यमः" इत्यादि विवेचनं॥८।१२।१॥

स्तुतिर्भवति ॥

"तस्यैषा भवति ॥ तयोः ॥ एषा ॥ यान्य-

(यजत्यै ॥

"दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो-
प्रचोदयन्ता विदथेषु कारू
प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥ ५ ॥

"दैव्यौ होतारौ प्रथमौ सुवाचौ निर्मिमानौ यज्ञं मनुष्यस्य मनुष्यस्य यजनाय प्रचोदयमानौ यज्ञेषु कर्तारौ पूर्वस्यां दिशि यष्टव्यमिति प्रदिशन्तौ" २ ॥ १२ ॥

(भाष्यम्- "दैव्यौ होतारौ" (ऋ.सं.८।६।१।७) इति" यावेतौ "दैव्यौ होतारौ"। देवेषु भवौ दैव्यौ। देवावेव वा दैव्यौ, स्वार्थे ॥ व तद्धितः। मनुष्य होतारौ अपेक्ष्य। दैव्यौ होतारौ- होतृ मित्रावरुणौ इति विशेषणम्। कौ पुनस्तौ। "होतारा होतारौ" अह्वातारौ देवतानाम्। वाय्वग्नी। विलक्षणौ। "प्रथमा" प्रथमौ "मुख्यौ मनुष्य होतारावपेक्ष्य। "सुवाचा" सुवाचौ" प्रशस्तवाचौ सुस्तुतौ। "मिमाना यज्ञम्" यज्ञ-निर्मातारौ। निर्यं "मनुषः मनुष्यस्य" यजत्यै-" यजनाय ॥

अनुयाजेषु उन्नीत सामर्थ्यात् पार्थिवत्वात्।

"मनुष्वत्", मनुष्वत्" इह" कर्मणि "चेतयन्ती", "चेतयमाना" यथा मनुष्येण मनुष्य आहूतः मो वक्तुं अविलम्बमानः आगच्छेत्, क्षिप्रमेवागच्छतु। सामर्मेह कर्मणि हविर्भोक्तव्यमित्येवमर्थं जानाना। "सरस्वती"च "मध्य स्थानाऽत्र मेव "चेतयन्ती" आ-गच्छतु। ताः ताः "तिस्रः" "अपि" देव्यः "स्वपसः" पशुकर्माणः" अस्मिन् कर्मणि "इदं बर्हिः "स्योनम्" "सुखम्" प्राप्य एतस्मिन् "आसीदन्तु "इत्येतदा-

२ (शास्त्रहेता(८।१३।२)

"त्वष्टा ॥ ११॥ त्वष्टा तूर्णमश्नुत इति नैरुक्ताः त्विषेर्वा स्याद्दीप्तिकर्मणः त्वक्षतेर्वा स्यात् करोति कर्मणः ॥ १ ॥

(११) "त्वष्टा" इति निर्वक्तव्यम्। अत्र तूर्ण शब्दात् क्षिप्रवाचिनः पूर्वपदम्। अश्नोतेरुत्तरपदम्। क्षिप्रं आप्नोति। यदनेन व्याप्तव्यं भवति। "त्विषेर्वा "धातोः वृद्ध्यर्थस्य वृद्ध एव नित्यमसौ देवतात्वात् "त्वक्षते-र्वा स्यात्" क्रियासामान्यवाचिनः, उत्सृष्टतनूकरण-

२ (स्वाधिस्य५८।१४।१)

भवति ५

तस्यैषा भवति — "तस्य एषा" प्राधान्यस्तुतिः

" य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा।
तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥

" य इमे द्यावापृथिवी " (ऋ. सं. १०।११०।९) इति (॥ २ ॥

(नि. भाष्यम्) " यः " त्वष्टा " इमे " द्यावापृथिव्यौ " –
सर्वेषां भूतानां " जनयित्र्यौ " रूपैः " नानाविधैः
अनेकप्रकारैः " अकरोत् " भूतानि च सर्वाणि ॥
अथवा " रूपैः " इति कर्तृत्वानया तृतीयया लक्ष्यते।
तत्तद्रूपमास्थाय " यः " त्वष्टा द्यावापृथिव्यावकरोत्।
भूतानि च सर्वाणि। किं तस्य त्वष्टुः ? तं " देवं "
" त्वष्टारम् " " इह " अद्यैतस्मिन्नहनि कर्मणि वा-
हे होतः ! " यक्षि " यज। " विद्वान् " जानानः यथेद-
मवश्यं कर्तव्यमिति ॥ ८।१४।२५

" माध्यमिकस्त्वष्टेत्याहुः मध्यमे च स्थाने -
समाम्नातः। अग्निरिति शाकपूणिः ॥ ३।१४ ॥

:: माध्यमिकस्त्वष्टा इति विचारः ॥ तत्रतावत् -
" माध्यमिकस्त्वष्टा इति आहुः ॥ आचार्याः।
केचित् नैरुक्ताः एवं मन्यन्ते। माध्यमिक इति -
सञ्ज्ञाप्रसिद्धिः ॥

२

को हेतुः "मध्यमे च स्थाने समाम्नातः" इति।
किञ्च ऽतस्मिन्नेव मन्त्रे व्यपदेशता कथम्?, य इमे
द्यावापृथिवी भूतानि च सर्वाण्यकरोत् तं देवं त्वष्टारं
यजेति। त्वष्टुरन्यो यष्टा। स ऽऽव पुनः सम्बोध्यते
हे होतरिति मनुष्यहोत्रा। न चान्यः पार्थिवादग्नेः
होताऽस्ति। तस्माद् यो यष्टा स पार्थिवः। यः
इज्यते स मध्यम स्त्वष्टेति। सर्वशिल्पितमाचार्यो
देववर्द्धकिः दाक्षायणीपुत्रो द्वादशानामादित्याना-
मन्यतमः इत्यैतिहासिकाः॥
कोऽत्र निश्चयः? अयमेव। "अग्निरिति शाकपूणिः"
कथं यत्तावत् मध्यमे च स्थाने समाम्नातः इति?
तदपि समानमिन्द्रेणापि त्वष्टृ व्यपदेश इति।
"त्वष्टा दधादिन्द्राय शुष्ममिति। अपि च व्यपदेशात्-
अन्यत्वमित्यशावस्य मध्यवत्स्यातुम्। अनन्यत्वेऽपि हि
व्यपदेशो भवति। तद्यथा "अग्निमग्न आवह" इति।
अत्र हे अग्ने भगवन्! अग्निं आवह इति व्यपदेशो
सत्यनन्यत्वम्। नहि पार्थिवादन्यः सूक्तभाग्वा
हविर्भाग्वा अग्निरस्ति। योऽनेन प्रायश्चित्तहोतृत्वा-

इति

भिधानेनाहूयेत। इत्येतच्च, "स्वं महिमानमावह",
स्विष्टकृति विशेषलिङ्गात् स्वयमेतत्स्थानाऽऽत्मानं
विधिवशाद् आह्वानेन संस्कृत्य द्वैधं त्रेधात् अनेकधा
यजति। अन्यद्वा अग्निं निवर्तयति॥ तद्वदिहापि
कर्मात्मनः परो योऽस्य लक्षणाक्रियालक्षणयोग्या (स्मा)
सदधिष्ठितः, कर्मात्मा सर्वरूपाणि पाकेन विकरोति।
केन विकरोति? तदधिकृत्योच्यते"- "त्वष्टा रूपाणि
विकरोति" इति। तदयमुच्यते - मनुष्यहोत्रा
यजत्वमिति। एवं तावद् अपदेशः शाकः प्रति-
समाधानः। यत्पुनरुक्तम् देवाशिल्पीति? तद्
गुणसामान्याद्देवतास्वपि कौशल्यातिशयमपेक्ष्य
उच्यते इत्यदोषः॥८।१४।२॥

"तस्यैषाऽपरा भवति"॥

यथाऽत्र अग्निरेव नान्यः, तथा "तस्य" एषा"
विशिष्टतरलिङ्गा "अपरा" ऋक् भवति॥ (उपस्थे"
"आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा-
उभे त्वष्टुर्बिभ्यतुर्जायमानात् प्रतीची सिंहं
(प्रति जोषयेते॥

(निरुक्तम्)

"आविः रवेदनात् तत्स्यो वर्धते चारस्यासु। चारु चरते, जिह्मम् जिहीतेः। ऊर्ध्वः उच्छ्रितो भवति। स्वयशाः आत्मयशाः, उपस्थे उपस्थाने। "उभे त्वष्टुर्बिभ्यतुर्जायमानात् प्रतीची सिंहं प्रति जोषयेते॥ "द्यावापृथिव्याविति वा॥१५

निरुक्तभाष्यम् - "आविष्ट्यो वर्धते० इति। (ऋ.सं.१।७।१९) "आविः" प्रकाशः। कस्मात्? "आवेदनात्" अर्कस्य प्रकाशनात्, तस्मात् "तत्त्यः" तस्य तनिता। "आविष्ट्यः" किंलक्षणः? "चारुः" चरणशीलः, अनवस्थितः। किं करोति? "वर्धते"। क्व? "आसु" क्रियासु। प्रजासु वा प्रसवाय। कस्य? "जिह्मानाम्"- कुटिलचेतसामपि मनुष्याणाम् अवैजात्येन ऊर्ध्वमेव ज्वलति। कुटिलानामपि इन्धनानां- अकुटिलः ऊर्ध्वमेवेति केचित्। "एवमेव वर्धते। "स्वयशाः" आत्मयशाः" परमनाश्रित्य यशस्वी, "उपस्थे" उपस्थाने" यत्रासावुपानतास्ति...

२ "अविक्षसः" योऽयमेवमादिगुणयुक्तः वक्षा, तस्य "वक्षुः" अग्नेः, "जायमानात्" एव; "उभे" द्वे अपि, "बिभ्यतुः"

"किं पुनस्ते" द्यावापृथिव्यौ" इति। यथाऽयमति-महान् वर्धते, अवश्यमावां धक्ष्यतीति॥

२ (८।१५।१)

"अहोरात्रे इति वा॥२॥

" अहोरात्रे इति वा" सकृदुपज्वालिते महसाग्ना-वुपशाम्यति। अहोरात्रयो रर्थवत्ता भावः। तस्मात् ते अपि बिभ्यतुः। अपि नामायमेवमाति-प्रवृद्धः। आवामन्यतर मनुच्छिन्द्यादिति॥

२ (॥८।१५।२)

" अरणी इति वा। प्रत्यक्तो सिंहं सहनं प्रत्या सेवेते॥३॥१५॥

"अरणी इति वा" अवश्यमयमावां जातो यदा तदा धक्ष्यतीति अतः अरणी अपि बिभ्यतुः। एवं बिभ्यत्यौ किं कुरुतः? नान्या गतिरस्तीति "प्रतीची" नाम तमेनं प्रपद्यते-(अभिमुखे-

"सिंहं" "सहनम्" अभिभवनम् "प्रतिजोषयेते"
'प्रह्लासेवेते" उपकारकत्वेन, कथं नामायमावां
नो भरतात् कुर्यादिति॥
ऽवमेधमेवाग्निरिह वहेति॥ ८।१६।३॥
" वनस्पतिः ॥१२॥
वनस्पति आख्यातः ॥१।१६॥
"वनस्पतिः"(१२) अवसरप्राप्तः। स पुनरयमाभि-
धेयतोऽभिधानतश्च "आख्यातः"(८।३।१)
"एष हि वनानां पाता वा पालयिता वा" इति।
"तस्यैषा भवति-॥ २ (८।१६।१)
'तस्य एषा" प्राधान्यस्तुतिर्भवति॥ हविरिति॥
"उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवींषि
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन
(नि०) "उपावसृज आत्मना ऽऽत्मानम्। समञ्जन्
देवानामन्नं ऋतावृतौ हवींषि काले काले
वनस्पतिः शमिता देवो अग्निरित्येते त्रयः
स्वदन्तु इमं मधुना च घृतेन च ॥१।१७॥
२

(निरुक्तभाष्यम्॥)

"उपावसृज०(ऋ०सं० ८।६।१।१०)

"उप" "आश्लिष्य" "अवसृज" एतत् पश्वादीनां "पाथः। अनाश्रितविशेषः;- किमयमग्निर्वा, यूपो वा इत्युच्यते। उत अन्य एव कश्चिदिह इति। उत्तरेऽर्धर्चे वनस्पतिशब्दः प्रथमासम्बन्धात् परोक्षः। इह उपावसृजेति मध्यमपुरुषयोगात् + प्रत्यक्षः + कोऽप्यभिधीयत इति सुतरामनाश्रित-विशेष इति विचारास्पदमिति। अतः परं विचा-रयिष्यति- "तत् को वनस्पतिः"? इति॥

"त्मन्या" "समञ्जन्" "आत्मना ऽऽत्मानम्" अस्य पशोः "समञ्जन्" समभिव्यञ्जयन् विशेषेण संस्करणेन स्वाधिकारसम्बन्धिना "देवानाम्" एतत् "पाथः" "अन्नम्" एतद्भागिना ऽमुनैव प्रकारेण" "ऋतुथा" च "ऋतावृतौ" "काले काले" षण्मासादौ "हवींषि" "चैतान्यन्यान्यपि आज्यप्रभृतीनि "उपावसृज "देवेभ्यो देहीति। किञ्च "वनस्पतिः" "शमिता देवः अग्निः" "इति-ते त्रयः" त्रिग्रहणात् देवशब्दोऽग्निविशेषणमिति (दर्शयिष्यति॥

"वनस्पतिश्च शमिता च अप्रसिद्धौ देवते ॥७॥
असन्दिग्धश्च देवोऽग्निरित्येते त्रयः। "स्वदन्तु"
"स्वदयन्तु" स्वादुतामापादयन्तु" मधुना" चोद-
केन प्रोक्षणाद्यभिप्रायं "घृतेन" चैतदस्माभिः
संस्कृतं पाथः इत्येतदाशास्महे॥ ८।१७।१ ॥

"तत् को वनस्पतिः ॥ १॥
तत को वनस्पतिरिति विचारः। ८।१८।१)।
"यूप इति कात्थक्यः ॥२॥
तत्र तावत् "यूप इति कात्थक्यः"
(अग्निरिति शाकपूणिः ॥
तस्यैषाऽपरा भवति – ॥
कस्मात्? यस्मात् यद्यप्येतस्यामाप्रियां
मन्त्राविष्कृतोऽग्निः विशेषः। तथापि यद्
"तस्य" एषा "अपरा" यूपाह्वनीया ऋक्
यां सन्निपत्य यूपाञ्जने यूपमभिधानेन
संस्करोति। तद्यथा – ॥

"अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन"
यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे॥

(नि०) "अञ्जन्ति त्वामध्वरे देवान् कामयमानाः वन-
स्पते मधुना दैव्येन च घृतेन च यदूर्ध्वः स्था-
स्यसि द्रविणानि च नो दास्यसि, यद्वा तेऽकृतः
क्षयो मातुरस्या उपस्थे उपस्थाने॥ ३।१८॥
(निरुक्तभाष्यम्)

"अञ्जन्ति त्वामध्वरे०(ऋ०सं० ३।१।३।१) इति
विश्वामित्रस्यार्षम्। पुरोरुक्। "देवेभ्यो वनस्पते"
इति च। हे यूप! "अञ्जन्ति त्वाम्" म्रक्षयन्ति-
त्वां ऋत्विग् यजमानाः। क्व? एतस्मिन्
"अध्वरे" यज्ञे। किमिच्छन्तः? "देवयन्तः"
देवान् यष्टुं कामयमानाः। केन अञ्जन्ति? हे
"वनस्पते" यूप! "मधुना" दैव्येन" संस्कृतेन
"घृतेन" इत्यर्थः॥ देवानां यन्मधु, विज्ञायते हि
"देवानां मधु यद् घृतम्" इति। किमित्यञ्जन्ति?
"यद् ऊर्ध्वस्तिष्ठाः" यस्मादक्तः त्वं "ऊर्ध्वः स्थास्यसि।
अञ्जनादनन्तरमुच्छ्रायिष्यन्ति त्वाम्।"

—

यस्माच्च ते "क्षयः" मातुः अस्याः "पृथिव्याः "उपस्थे" उपरि। "क्षयो" निवासः, स्थैर्यार्थं भवरः। तस्मादवश्यमूर्ध्वः स्थास्यसि॥ तथा स्थित्वा पशुधारणसमर्थः, प्रधानक्रियापूर्वाङ्गं भावयित्वा तद्द्वारेण तत्फलानि "द्रविणानि च" अवश्यम् अस्मभ्यं "दास्यसि" इ सतः समञ्जन्ति॥

एतस्मिन् समञ्जने यूपे "वनस्पति-शब्दः प्रयुक्तः। तस्मात् यूपो वनस्पतिरिति॥ ८।१८।३॥

"अग्निरिति शाकपूणिः॥१॥

"अग्निरिति शाकपूणिः" ८।१९।१॥

"तस्यैषाऽपरा भवति॥ –

"कस्मादिदाव्युपाव स्तृणोति। अस्यानाविष्कृतवनस्पतिशब्दार्थत्वाद् भवतु परोक्षो यूपः। परम्परा अस्य हविर्वाहनालिङ्गलिङ्गितापुरोरुक् यजतो सन्निपत्य "तस्य" अग्नेर्वनस्पतिशब्देन अभिधायिका "एषा" "अपरा" ऋग् भवति

2 (तद्यथा-

अर्थम् ॥

" देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते ^
प्रदक्षिणिद्रशनया नियूय ऋतस्य वक्षि पथिभी रजिष्ठैः

(निरुक्तम् " देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण ऋत-
पर्णाऽपि वोपमार्थे स्याद् हिरण्यवर्णपर्णेति,
प्रदिवस्ते अर्थम् पुराणस्ते सोऽर्थः, यं ते
प्रब्रूमो यज्ञस्य वह पथिभी रजिष्ठैः ऋजु-
तमैः रजस्वलतमैः प्रपिष्टतमैरिति वा ॥
(२।१९॥

नि॰भाष्यम् - " देवेभ्यो वनस्पते॰ इति । वसिष्ठस्यार्षम् ।
हे वनस्पते ! " अग्ने ! " हिरण्यपर्ण ! हिरण्योपवर्ण !,
ज्वलित ! " देवेभ्यः " हवींषि " वक्षि " वह ! ।
कथम् ? इति । " प्रदक्षिणित " प्रदक्षिणं देवानां
योऽयं विहरनधर्मः, तेन पितृधर्मविपरीतेन ।
कथं वहनम् ? " रशनया " नियूय " निवध्य,
सुनिपुणं यथा न कश्चिदपि हविरनपेक्षितं
धूमम् तेन प्रभ्रश्येत् तथा । अपि च " ऋतस्य "
" यज्ञस्य " पथिभिः " रजिष्ठैः " सर्वप्रसिद्धैः
पन्थानो यज्ञस्य हविर्वहनाय देवान् प्रति ऋजुभ्योऽ

पि —

"ऋजुतमैः" यैः कालो नातिहीयेत,
"रजस्वलतमैः" असर्थमुदकवद्भिः,
तेहि पथिकानां सुखाः, "प्रपिष्टतमैः" इति
सुरूपतमैः प्रहतकण्टकैः यैः असम्मोहः स्यात्
गच्छतः तैः। (वक्षि "वह") नच पुनरविदिते
कर्मणि त्वं विनियुञ्महे। यतो ब्रूमः "प्रविद्वां" त्व"
"अर्यम्" चिरन्तनमेव ते अर्थम्। हविर्वहनाधिकरणे
विद्मः। "अयं यो होता" इत्येवमादिमन्त्रेभ्यः।
"देवा देधिरे हव्यवाहम्" इति। (ऋ० सं० ८।१९।२१)
अतो ब्रूमहे वहेति।।
एतस्मिन् मन्त्रे हविर्वहनसंयोगात् "~~वनस्पति~~
वनस्पतिशब्दस्य अग्निरभिधेयः॥।
(॥ ८।१९।२॥

"तस्यैषा अपरा भवति।
अथ तस्य वनस्पतेः "अग्नेः" "एषा" "अपरा"
ऋग्" "भवति"। (सा पुनः किमर्थम्? इति।
प्रायो वृक्षपदर्शनः। बहुषु मन्त्रेषु अग्निः
वनस्पतिरिति।

(विद्वान्)

"वनस्पते रशनया नियूय पिष्टतमया वयुनानि—
वह देवत्रा दिधिषो हवींषि प्र च दातारममृतेषु वोचः॥"

।निरुक्तम्- "वनस्पते रशनया नियूय, सुरूप-
तमया वयुनानि विद्वान्। प्रज्ञानानि प्र-
जानन्, वह देवान् यज्ञे दातुर्हवींषि
प्रब्रूहि च दातारममृतेषु देवेषु॥९।२०॥
(निरुक्त = भाष्यम्)

"वनस्पते रशनया॰ इति। वनस्पते रेव वक्तव्या।
हे "वनस्पते" "रशनया" "नियूय" "पिष्टतमया"
"सुरूपतमया" अत्यर्थं दृढया दावमादिगुण-
युक्तया! रशनया "नियूय" अप्रध्वंसनाय
निबध्य, "वयुनानि" स्वाधिकारयुक्तानि
"प्रज्ञानानि" अस्मदुपकाराय "विद्वान्"
"जानानः" "वह" दत्तानि अस्मत्प्रदत्तानि
"हवींषि"। अस्य "दिधिषोः" दातुः
यजमानस्य अभिमत फल प्राप्तये "देवत्रा"
देवान् प्रति प्रदातारम्, "अमृतेषु वोचः"
प्रवोचः कथयस्व, दानं "दातारम्" अमृतेषु प्रत्तानि
"देवेषु" अमुना यजमानेन दत्तानि हवींषि"

"यत् पुनरेतदुक्तम् यूपाञ्जनीयायाम्।
"यूपे वनस्पति शब्दः" इति।
अत्र ब्रूमः – "अग्निरेवासौ यूपान्तर्गतो यूपात्मना
वर्तमानः यूपाञ्जनीयायां वनस्पति शब्देनोच्यते।
तदुक्तम् – "एषहि वनानां पाता पालयिता वा" इति।
यस्मादन्तर्गतो वनानां वनानि दहति, तस्मात्
एव वनस्पतिः। उक्तंच "योऽयम् बीसे पृथिव्या-
मग्निः अन्तरोषधि वनस्पतिषु अप्सु तमुन्वि-
न्यधुः सर्वगणं सर्वनामानम्" इति॥
योऽयमाग्निरेवानेन वनस्पति शब्देन यूपा-
भिधानेन वनस्पतिरभिधेयः इत्यदोषः॥
"अपरे पुनः" अञ्जन्ति त्वाम्" इति, आधियज्ञात्
पृथक् त्वेमाधिदैवतमुत्पाद्य शाकपूणिमतेन
अग्निपरत्वेनोपवर्णयन्ति। यद्यप्याधियज्ञे अस्य
यज्ञाङ्गाभिवादः, तथाऽपिनाधिदैवतमाग्नि-
माभिधातुमस्याः परिहीयते सामर्थ्यं मन्त्रार्थे इति।
तत् कथम्? – "अञ्जन्ति त्वामध्वरे देवयन्तः।
हे भगवन्! अग्ने! "अञ्जन्ति त्वाम्" —

(किरा)

आधाराधाहुतिभिः, "अध्वरे" यज्ञे "देवयन्तः" देवान् कामयमानाः। यस्मात् त्वम् "ऊर्ध्वः" स्थास्यसि ज्वलिष्यसि, यच्च ते "क्षयः" "मातुः" वेद्याः "उपस्थे" "उपस्थाने" उपरि उत्तर वेद्याः "क्षयः" निवासः कृतः तत्रोप ज्वलितः, "द्रविणानि" धनानि यज्ञसिद्धौ यज्ञफलानि अस्माकं अवश्यं "दास्यसि" इति।

अतस्त्वामाहुतिभिरञ्जन्ति॥

"काश्चस्य पक्षेऽपि" "देवेभ्यो वनस्पते" "वनस्पते रशनया नियूय" इत्यनयोरर्थयोजना।

हे "वनस्पते" वानस्पत्य! यूप! त्वमुच्यसे।

"हिरण्यपर्ण" ऋतपर्ण! वह एतानि "हवींषि" अनुष्ठिते त्वयि न एतानि उच्यन्त इति त्वमेषां वोढा इति प्रतीमहे। कथं च पुनर्वह? "प्रदक्षिणित्" यथैतानि वोढव्यानि आविपर्यस्यन्ते तेन विधिना "रशनया" एतयात्रिकृता नियूय परिवीयत्वा आत्मानम् "ऋतस्य" यज्ञस्य ये पन्थानः राजिकाः प्रदिवः चिरंतनाः ततानवायमकर्थः त्वया हवींषि वोढव्यानि इति॥

२

विज्ञायते च "यूपेन वा आहुतयः स्वर्गं लोकं
यन्ति" इति। "वनस्पते रशनया नियूय"।
हे "वनस्पते" वानस्पत्य! यूप! "रशनया"
"पिष्टतमया" सुरूपतमया त्रिवृता "नियूय"
परिवीय वा त्वमात्मानम् बद्ध्वा पात्राणि "हवींषि"
स्वाधिकार प्रयुक्तानि प्रस्थानानि प्रजानन्।
"देवत्रा" देवान् प्रति दिधिषोः हविर्दातुः-
अर्थसिद्धये "प्रब्रूहि" च "एनं दातारम्-
"अमृतेषु देवेषु इति ॥८।२०।१॥

२

"स्वाहाकृतयः ॥१३॥ इति त्रयोदश-
पदानि ॥२॥

"स्वाहाकृतयः स्वाहेत्येतत् सु-आहेति वा।
स्वा वाग् आहेति वा, स्वं प्राहेति वा,
स्वाहुतं हविर्जुहोतीति वा ॥१॥
"स्वाहाकृतयः निर्वक्तव्याः। काः पुनः
(१३)
ताः स्वाहाकृतयः? याः यागार्थमाहूय
उत्तमे प्रयाजे स्वाहाकारेण संस्क्रियन्ते।

ताः स्वाहाकृतयः॥ ननु "सद्यो जातः" इति
आग्नेयो मन्त्रः? सत्यमाग्नेयो मन्त्रः शौनकस्य।
तथाऽपि स्वाहाकृतयः समाम्नाताः। किं कारणम्?।
"सद्यो जातः" इत्यनु द्रुत्य अग्नेः स्तुतिमन्त्रे
"स्वाहाकृतं हविरदन्तु देवाः" इति सम्प्रदानम्।
तत्र देवतार्थं सम्प्रदानमिति स्वाहाकृतयः
समाम्नाताः, नाग्निरिति॥
"अथ स्वाहाकृतयः कस्मात्? स्वाहा स्वाहेति
अनुकीर्तनेन अस्यामुत्तमस्य प्रयाजस्य
प्रैष संस्कारः क्रियते इति" स्वाहाकृतयः॥
अथ "स्वाहा - इति - एतत्" कस्मात्? "सु" "सुष्ठु -
"आह" - इति वा, यदेव सम्प्रदानं देवतायै किञ्चित्
आऽध्वर्युरसनेन मन्त्रेणाह तुभ्यमिदमिति।
तदेव "सु - आह" शोभनमाह। एवमस्य "सुः"
पूर्वपदम्। "आह" इत्युत्तरपदम्। अथवा इद-
मन्यत् ब्राह्मणानुगतं निर्वचनम्।
"स्वा वागाहेति वा" इति। विज्ञायते हि -
"तां स्वा वागभ्यवदज्जुहुधीति तत् -

स्वाहाकारस्य जन्म" - इति।
अन्यच्च स्वशब्दः पूर्वपदम् उत्तरपदम्
तथैव। अथ "स्वं प्राह" इति "वा"।
को विशेषः पूर्वस्मात्? पूर्वपदे उस्य कारका-
न्यत्वम्। स्वा वाग् आह इति कर्तरि। स्वं प्राह इति
कर्मणि। प्र पूर्वं चोत्तरपदं प्रकर्षद्योतनाय।
" स्वाहुतं हविः जुहोति इति वा"
यदनेनैव हविर्जुहोतीति, तदेवसु ... उच्यते
यथा विधानमन्त्रो जुहोतीति हविः प्रधानोऽत्र
" तस्यैषा भवति " - (८।२१।१)
तासां स्वाहाकृतीनां एषा भवति " पुरोगमः।
" सद्यो जातो अमिमीत यज्ञमग्निर्देवानामभवत् -
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं
२ (हविरदन्तु देवाः "
(निरुक्तम्. " सद्यो जायमानो निरमिमीत यज्ञम्
अग्नि देवानामभवत् पुरोगमः "
अस्य होतुः प्रदिश्यृतस्य वाच्यास्ये स्वाहा-
कृतं हविरदन्तु देवाः ॥२॥
२

"सद्यो जातः (ऋ.सं.८।६।१५) इति"
"योऽयमग्निः "सद्यः" "जातः" जायमानः, अनन्तरमेव "व्यमिमीत यज्ञम्" निर्वर्तयति यज्ञम्। यश्च जायमान एव "अग्निः- देवानां अभवत्" "पुरोगाः" पुरोगामी" अग्रतो गामी प्राधान्येन। तस्य "अस्य" "होतुः" देवानामाह्वातुः, "प्रदिशि" "प्राच्यां दिशि" "ऋतस्य" गतस्य प्रणीतस्य, उत्तरवेद्यादिकं तेन "वाचि" आस्ये" वाचीति आस्यमेवापेक्ष्य, "स्वाहाकृतम्" स्वाहाकारवल्लात् मन्त्रेण प्राक्षिप्तम्, हविः दातव्यम्। "अदन्तु" पिबन्तु "देवाः" स्वाहाकृतयः॥ ८।२५।२)
"इतीमाः आप्री देवताः अनुक्रान्ताः"॥३॥
"इति" इतिकारोऽधिकारसमाप्त्यर्थः। प्रदर्शनार्थो वा। इमाः एता एव एकादश "आप्री देवताः" अनुक्रान्ताः" इध्माद्याः।

ननु द्वादशानामनुकीर्तनम्? सत्यम्। अनुक्रान्तानां
तु एकादशवनस्पत्यन्ताः, आसामिह विचारः। ननु
स्वाहाकृतिषु विचारोऽस्ति। तत्र देवता(संस्कार)परत्वात्+
उत्तमस्य प्रयाजस्य यजतौ एकादशग्रहणात्
एकादशप्रयाजविषय एव उत्तरो विचारः इत्याचार्यैरि
प्रायो गम्यते। ततः किम्? यदि अनुक्रान्तास्तासामपि
विचारो वर्तिष्यते। ननु विचारितमेव "यज्ञेध्म इति
कात्थक्यः" "अग्निरिति शाकपूणिः" इत्येवमादि?।
सत्यं विचारितमेतत्। स तु प्रत्येकमाप्रीदेवता-
पदेषु विचारः। अयं तु सामान्य~~...~~ प्रकरण-
गतश्चास्यामेव विचारः अनिश्चितानां निश्च-
यावधारणार्थः। निश्चितेन हि सुव्यवस्थितेन
विधिना भवितव्यम्। आप्रि यज्ञे यजतौ
देवताङ्गभावश्रवणात्। तदेतद् विषय-
मनिश्चितम् ८।२१।३)

"प्रचोदयन्ता" "विदथेषु" ~~कारु~~ "यज्ञेषु" "कारू"
"कर्तारौ" "ऋत्विजौ", नानग्निको यज्ञोऽस्तीति
अग्निर्निर्मीयते। तथा च वनुपद्यमानो वायुना ज्वलतीति
वायुर्निर्मीयते। विज्ञायते हि "तस्मादेव नानुपद्यमानो
ज्वलति। इति। एतौ मैत्रावरुणौ वायुरग्नी होतृवद्वि-
यज्ञे वर्तमानस्याग्निसंचोदयितारौ, तन्मूलत्वाच्च यज्ञकर्मणः,
तावेव दैव्यावाहूतारौ उच्येते। यावेतावेवं "प्रचोदयन्तौ"
"विदथेषु" "यज्ञेषु" "कारू" "कर्तारौ" मनुष्य(स्य) होतुः अनु-
ग्रहस्य नित्यं स्वाधिकार कर्मानुग्रह सन्निधानात्।
एवञ्च
यदेतत् "प्राचीनं" "प्राच्यां दिशि" प्रद्योतिः "आहवनीया-
प्रणीयते। "प्रादिशः" मन्त्रेण "प्राचीमनु प्रदिशं प्रेहीति-
अनेन विधिवाक्य प्रदेशेन, अनेन वा "प्राच्यमुद्धरति"-
इति। एतत् प्रणीय नित्यं यक्ष्यमित्येवमर्थं "प्रादिशन्तौ"
आसादयन्ता विदथौ नित्यमभियोगेन स्वभावतो यज्ञा-
कारे वर्तमानौ तौ मम व्येवं वर्तेतामिति। एवमा-
ख्यात मध्यहृदः सम्भाव्यते, निरुक्तात् तात् मन्त्रस्या

२

"तिस्रो देवीः॥ १० ॥

" तिस्रो देवीस्तिस्रो देव्यः॥ २५

"तिस्रो देवीः"(१०) इति पदम्। ताः पुनरेताः

"तिस्रः" एव "देव्यः" प्रथमया वा निराह।

"तिस्रः" इति देवी शब्दस्य विशेषणम्॥(८।१३।१)

" तास्मा मेषा भवति प

" तास्यमेषा भवति प्राधान्यस्तुतिः॥

"आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती।

तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु॥

"एतु नो यज्ञं भारती क्षिप्रम्। भरत आदित्यः

तस्य भाः इळा च मनुष्वदिह चेतमाना तिस्रो देव्यो

बर्हिरिदं सुखं सरस्वती च सुकर्माण आसीदन्तु॥ २।१३॥

(निरुक्तस्य भाष्यम्)

"आ नो यज्ञं भारती०" (ऋक्.सं. ८।८।१।१२) इति।

आभिमुख्येन अस्माकं यज्ञमागच्छतु। का पुनरसौ? इति

"भारती॥ भरत आदित्यः" सर्वभूवान्युदकेन बिभर्तीति॥

"तस्य स्वभूता" "भाः" दीप्तिः। कथमेतु "तूयम्" क्षिप्रम्

"इळा" च पृथिवीस्थाना। "इहैवेळया वसुमत्या" इति-